॥ श्रीजिनाय नमः ॥

( सान्वयं गूर्जरभाषांतरसहितं च )

# ॥ श्रीसंवरमुनि चरित्रं ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय सहित भाषांतर करनार तथा छपावी प्रसिद्ध करनार—पंडित श्रावक हीरालाल हंसराज.

( आ ग्रंथना अन्वय तथा भाषांतरना प्रसिद्ध कर्ताए सर्व हक स्वाधिन राख्या छे)

विक्रम संवत् १९८४ किमत रु. १-१२-० सने १९२८

॥ श्रीजिनाय नमः ॥

( श्रीचारित्रविजयगुरुभ्यो नमः )

( सान्वयं गूर्जरभाषांतरसहितं च )

# ॥ श्रीसंवरमुनिचरित्रं प्रारभ्यते ॥

( मूलकर्ता—श्रीवर्धमानसूरिः )

अन्वय तथा गुजराती भाषांतर कर्ता—पंडित श्रावक हीरालाल हंसराज—जामनगरवाळा

सत्कर्माभ्युदये हेतुं शीलं सेव्यमिदं सताम्। दुःकर्मदारि सत्कर्मकारि सेव्यतमं तपः ॥ १ ॥

अन्वयः—सत्कर्म अभ्युदये हेतु इदं शीलं सतां सेव्यं, दुःकर्म दारि, सत्कर्म कारि तपः सेव्यतमं. ॥ १ ॥

अर्थः—उत्तम कर्मोना अभ्युदयमाटे कारणरूप आ शीलने सज्जनोए सेववुं, तथा दुष्कर्मोनो विनाश करनारो, अने सत्कर्मोने करनारो तप विशेष प्रकारे सेववो. ॥ १ ॥

अनादिसिद्धदुःकर्मद्वेषिसंघातघातकम् । इदमाद्रियते धीरैः खड्गधारोपमं तपः ॥ २ ॥

अन्वयः-अनादि सिद्ध दुःकर्म द्वेषि संघात घातकं, खड्गधारा उपमं इदं तपः धीरैः आद्रियते. ॥ २ ॥

अर्थः—अनादिकाळथी प्रगटेलां दुष्कर्मोरूपी शत्रुओना समूहनो नाश करनारो, अने तलवारनी धारासरखो आ तप धैर्यवंतो करी शके छे. ॥ २ ॥

ज्ञानचक्षुषि नैर्मल्यं तत्त्वातत्त्वावलोकनम् । तपस्तपनवद्दत्ते तमःशमनतः सताम् ॥ ३ ॥

अन्वयः-तपः तपनवत् तमः शमनतः सतां ज्ञान चक्षुषि नैर्मल्यं तत्त्व अतत्त्व अवलोकनं दत्ते. ॥ ३ ॥

अर्थः-तप छे ते सूर्यनीपेठे अज्ञानरूपी अंधकारने दूर करीने सज्जनोने ज्ञानरूपी चक्षुमां निर्मलता (आपीने) तत्त्व तथा अतत्त्वने देखाडी आपे छे. ॥ ३ ॥

कर्मैधांसि दहन्पुष्टस्तपोवह्निरयं नवः । हरते देहिनां दाहं यः संसारसमुद्भवम् ॥ ४ ॥

अन्वयः—कर्म एधांसि दहन् पुष्टः अयं तपः वह्निः नवः, यः देहिनां संसार समुद्भवं दाहं हरते. ॥ ४ ॥

अर्थः—कर्मोरूपी काष्टोने बाळीने वृद्धि पामेलो आ तपरूपी अग्नि (खरेखर) आश्चर्य उपजावनारो छे, केमके जे प्राणीओने संसारथी उत्पन्न थयेला तापने दूर करे छे! ॥ ४ ॥

तत्तपः सेव्यतां दक्षा दुःकर्मक्षालनोदकम् । यत्सेवया रयादेव सेव्योऽभूद् भुवि संवरः ॥ ५ ॥

अन्वयः—तत् (हे) दक्षाः ! दुःकर्म क्षालन उदकं तपः सेव्यतां ? यत् सेवया संवरः रयात् एव भुवि सेव्यः अभूत्. ॥५॥

अर्थः—माटे हे चतुर मनुष्यो ! दुष्कर्मोने धोइ नाखवामाटे जलसरखा तपनुं तमो सेवन करो ? के जे तप सेववाथी संवरनामना मुनि पृथ्वीपर सेवाने पात्र थया. ॥ ५ ॥

तथाहि हृदयग्राहिगुणसागरनागरा । जम्बूद्वीपेऽस्त्ययोध्या पूर्भरतक्षेत्रभूषणम् ॥ ६ ॥

अन्वयः—तथाहि-जंबूद्वीपे हृदय ग्राहि गुण सागर नागरा, भरत क्षेत्र भूषणं अयोध्या पूः अस्ति. ॥ ६ ॥

अर्थः-ते संवरमुनिनुं उदाहरण कहे छे-जंबूनामना द्वीपमां हृदयनुं आकर्षण करनारा गुणोना महासागरसरखा नागरिकोवाळी, तथा भरतक्षेत्रना अलंकारसरखी अयोध्यानामनी नगरी छे. ॥ ६ ॥

इहाजनि महोजानिर्महासेन इति श्रुतः । चिन्तामणिषु यद्दानं श्रियो बिम्बमिवेक्ष्यत ॥ ७ ॥

अन्वयः—इह महासेनः इति श्रुतः महीजानिः अजनि, यत् दानं श्रियः बिंबं इव चिंतामणिषु अैक्ष्यत. ॥ ७ ॥

अर्थः-ते नगरमां महासेननामनो प्रख्यात राजा हतो, के जेनुं दान लक्ष्मीना प्रतिबिंबनीपेठे चिंतामणिओमां देखातुं हतुं. ॥७॥

अभूद् भूपस्य मान्योऽस्य सार्थेशो धनदाभिधः । मूर्ता वृषा इव वृषा रेजुर्यस्य धनार्जने ॥ ८ ॥

अन्वयः—अस्य भूपस्य मान्यः धनद अभिधः सार्थ ईशः अभूत्, यस्य वृषाः धन अर्जने मूर्ताः वृषाः इव रेजुः. ॥ ८ ॥

अर्थः—ते राजानो मानीतो धनदनामे (एक) सार्थपति हतो, के जेनी मालीकीना बळदो द्रव्य उपार्जन करवामां जाणे शरीरधारी धर्मो होय नही ! तेम शोभता हता. ॥ ८ ॥

**धनश्रीरिति तस्यासीत्प्रेयसी श्रेयसी गुणैः । बभौ प्रथमसख्यस्य या तीर्थं रूपशीलयोः ॥ ९ ॥**

अन्वयः-तस्य गुणैः श्रेयसी धनश्रीः इति प्रेयसी आसीत्, या रूप शीलयोः प्रथम सख्यस्य तीर्थं बभौ. ॥ ९ ॥

अर्थः—ते सार्थवाहने गुणोथी मनोहर धनश्री नामनी स्त्री हती, के जे रूप अने शीलनी प्रथम मित्राइना तीर्थ (संगम) तरीके शोभती हती. ( अर्थात् अनुपम रूप अने शीलवडे ते शोभती हती. ) ॥ ९ ॥

**दुर्गतेर्निर्गतः कोऽपि जीवः पीवरदुःकृतः । कैश्चिद्भाग्यैरभाग्यानां तस्या गर्भमवातरत् ॥ १० ॥**

अन्वयः—दुर्गतेः निर्गतः, पीवर दुःकृतः कः अपि जीवः अभाग्यानां कैश्चित् भाग्यैः तस्याः गर्भं अवातरत्. ॥ १० ॥

अर्थः—दुर्गतिमांथी निकळेलो, तथा घणा दुष्कर्मोवाळो कोइक जीव अभाग्योनां केटलांक भाग्योवडे तेणीना गर्भमां उत्पन्न थयो. ॥ १० ॥

**शये पांशुजुषि क्ष्मायां मुण्डिता खण्डितांशुका । इत्यस्या गर्भनिर्भाग्यैर्दुःखदो दोहदोऽजनि ॥ ११ ॥**

अन्वयः—मुंडिता खंडित अंशुका पांशुजुषि क्ष्मायां शये, इति अस्याः गर्भ निर्भाग्यैः दुःखदः दोहदः अजनि. ॥ ११ ॥

अर्थः—(मस्तक) मुंडावीने, फाटां त्रुटां कपडां पेहेरी धुडथी भरेली जमीनपर हुं शयन करुं, एरीतनो तेणीने गर्भना अभाग्योथी

दुःखदाइ दोहलो उत्पन्न थयो. ॥ ११ ॥

**नाविष्करिष्ये निःशेषद्रोहदं दोहदं क्वचित् । अपत्यमेनमुत्पन्नमेव त्यक्ष्यामि च क्षणात् ॥ १२ ॥**

**इति ध्यानवती यावद्दिनानि गमयत्यसौ । तावद्विधिनियोगेन धनदो निधनं ययौ ॥ १३ ॥ युग्मम् ॥**

अन्वयः—निःशेष द्रोहदं दोहदं क्वचित् न आविष्करिष्ये, च एनं अपत्यं उत्पन्नं एव क्षणात् त्यक्ष्यामि, ॥ १२ ॥ इति ध्यानवती असौ यावत् दिनानि गमयति, तावत् विधिनियोगेन धनदः निधनं ययौ. ॥ १३ ॥ युग्मं ॥

अर्थः—सर्वदुःख आपनारो (आ) दोहलो क्यांयें (हुं) प्रगट करीश नही, तेमज आ बाळकने उत्पन्न थतांज तुरत तजी देइश, ॥ १२ ॥ एम विचारती एवी ते धनश्री जेवामां दिवसो व्यतीत करे छे, तेवामां कर्मयोगे ते धनद सार्थवाह मरण पाम्यो ॥ १३ ॥ युग्मं ॥

**धनं यद्यस्य हस्तेऽभूत्तत्तेन जगृहेऽखिलम् । दोहदोऽस्याः स्वभावेन पूर्णस्तूर्णतरस्ततः ॥ १४ ॥**

अन्वयः—यद् धनं यस्य हस्ते अभूत् तत् तेन अखिलं जगृहे, ततः अस्याः दोहदः स्वभावेन तूर्णतरः पूर्णः. ॥ १४ ॥
अर्थः जे धन जेना हाथमां हतुं, ते ते माणसे सघळुं पचावी पाड्युं, अने तेथी तेणीनो दोहलो स्वभावथीज वहारे जलदी पूर्ण थयो.

**पूर्णैर्दुर्दिवसैस्तस्या जातः पातकवान् सुतः । पिङ्गाक्षिकेशः कृष्णाङ्गः कुब्जो न्युब्जः खरस्वरः ॥ १५ ॥**

अन्वयः-पूर्णैः दुर्दिवसैः तस्याः पातकवान्, पिंग अक्षि केशः, कृष्ण अंगः, कुब्जः, न्युब्जः, खरस्वरः सुतः जातः. ॥१५॥

अर्थः-दुःखी दिवसो संपूर्ण थयाबाद तेणीने पापी, पीळां नेत्रो तथा केशोवाळो, श्याम शरीरवाळो, कुबडो, कदरूपो तथा गधेडाजेवा स्वरवाळो पुत्र उत्पन्न थयो. ॥ १५ ॥

**सदुःखा सूतिरोगार्ता मुक्ता परिजनेन सा । ईदृग्गात्रे सुते जातमात्रे तत्र मृता ततः ॥ १६ ॥**

अन्वयः—सदुःखा, सूति रोग आर्ता सा परिजनेन मुक्ता, ततः ईदृग् गात्रे तत्र सुते जातमात्रे मृता. ॥ ८६ ॥

अर्थः—दुःखणी, तथा प्रसूतिना रोगथी पीडायेली एवी ते धनश्रीनी ( तेणीना ) परिवारे ( कंइ ) सारवार करी नही, अने तेथी आवां कदरूपां शरीरवाळो ते पुत्र जन्मतांज ते मृत्यु पामी. ॥ १६ ॥

**तस्या दत्तः शिखी तुल्यजातिभिः प्रातिवेश्मकैः । पयांसि कृपया सोऽपि पायितः प्राणितश्च तैः ॥१७॥**

अन्वयः-तुल्य जातिभिः प्रातिवेश्मकैः तस्याः शिखी दत्तः, च सः अपि तैः कृपया पयांसि पायितः प्राणितः. ॥१७॥

अर्थः-नातीला पाडोशीओए तेणीनो अग्निसंस्कार कर्यो, तथा ते बाळकने पण तेओए दया लावी, दूध पाइने उछेर्यो. ॥१७॥

**उत्पन्नेनामुना सर्वं श्रीकुटुम्बादि संवृतम् । ततः संवर इत्यस्य जनैर्नाम विनिर्ममे ॥ १८ ॥**

अन्वयः-अमुना उत्पन्नेन श्रीकुटुंब आदि सर्वं संवृतं, ततः जनैः " संवर " इति अस्य नाम विनिर्ममे. ॥ १८ ॥

अर्थः-आना जन्मथीज लक्ष्मी तथा कुटुंब आदिक सर्व संवृत एटले नष्ट थयुं छे, तेथी लोकोए " संवर " एवुं ते बाळकनुं

नाप राख्युं. ॥ १८ ॥

अज्ञानजनदुर्वाक्यताडनैर्ववृधेऽधिकम् । ग्रीष्मवातरजःपातैर्यवासक इवासकौ ॥ १९ ॥

अन्वयः-ग्रीष्म वात रजः पातैः यवासकः इव असकौ अज्ञान जन दुर्वाक्य ताडनैः अधिकं ववृधे. ॥ १९ ॥

अर्थः—ग्रीष्मऋतुना वायुथी उडेली रज पडवाथी जेम जवासो वृद्धि पामे, तेम आ संवर अज्ञानी लोकोनी गाळो, तथा ताडनथी अधिक वृद्धि पामवा लाग्यो. ॥ १९ ॥

वैरूप्यमेव तस्याभूत्पत्तने वर्तनं शिशोः । विटानां विटविद्यैव जीवनं जायते यतः ॥ २० ॥

अन्वयः—तस्य शिशोः वैरूप्यं एव पत्तने वर्तनं अभूत्, यतः विटानां विटविद्या एव जीवनं जायते. ॥ २० ॥

अर्थः-ते बाळकनुं कदरूपापणुंज नगरमां ( तेनी ) आजीविकारूप थइ पड्युं, केमके ठगोनी ठगविद्याज ( तेओनी ) आजीविकारूप थाय छे. ॥ २० ॥

तारुण्येनापि वैरूप्यं हृतं नास्य मनागपि । लेष्टुं वैकटिको यस्मादुत्तेजयितुमक्षमः ॥ २१ ॥

अन्वयः—तारुण्येन अपि अस्य मनाक् अपि वैरूप्यं न हृतं, यस्मात् वैकटिकः लेष्टुं उत्तेजयितुं अक्षमः. ॥ २१ ॥

अर्थः-युवावस्थाए पण तेनुं जरा पण कदरूपापणुं दूर कर्युं नही, केमके मणिआर ( पण कंइ ) ढेफांने चळकतुं करवाने समर्थ थइ शकतो नथी. ॥ २१ ॥

उलूक इव काकोलैर्लोलैः कोलाहलोल्बणैः । पुरि भ्राम्यन्नसौ डिम्भैः संभूय स्माभिभूयते ॥ २२ ॥

अन्वयः—लोलैः कोलाहल उल्बणैः काकोलैः उलूकः इव पुरि भ्राम्यन् असौ डिंभैः संभूय अभिभूयतेस्म. ॥ २२ ॥

अर्थः-दोडता तथा अत्यंत कोलाहल करता कागडाओ जेम घूवडने संतापे छे, तेम नगरमां भमता एवा ते संवरने छोकरांओ एकठा थइने संतापवा लाग्या. ॥ २२ ॥

दुर्बलानां बलं राजकुलमित्येष चिन्तयन् । तत्र चेद्याति तद्राजपुत्रकैः पीड्यतेऽभितः ॥ २३ ॥

अन्वयः-दुर्बलानां राजकुलं बलं, इति चिंतयन् एषः चेत् तत्र याति, तत् राजपुत्रकैः अभितः पीड्यते. ॥ २३ ॥

अर्थः-नबळाओमाटे राजकुलनुं बल होय छे, एम विचारीने जो ते त्यां जाय, तो राजपुत्रो (त्यां) तेने चोतरफथी संतापता हता.

खेदात्त्यक्तपुरोऽताडि पथिकैः पथि कैर्न सः । ग्राम्यैर्ग्रामे विशँल्लेष्टुयष्टिमुष्टिभिरप्यथ ॥ २४ ॥

अन्वयः—खेदात् त्यक्तपुरः सः पथि कैः पथिकैः न अताडि ? अथ ग्रामे विशन् ग्राम्यैः अपि लेष्टु यष्टि मुष्टिभिः (अताडि)

अर्थः—कंटाळीने तजेलुं छे नगर जेणे, एवा ते संवरने मार्गमां कया पंथीओए न मार्यो ? (अर्थात् सर्वेए मार्यो.) वळी ( कोइ) गामडामां दाखल थतां गामडीआओ पण (तेने) पत्थर, लाकडी तथा मुष्टिओवडे प्रहार करवा लाग्या. ॥ २४ ॥

इत्यसौ सर्वतः सर्वैरप्यत्यर्थं कदर्थितः । निचितं चिन्तयामास निःश्वासोच्छ्वसिताननः ॥ २५ ॥

अन्वयः-इति सर्वतः सर्वैः अपि अत्यर्थ कदर्थितः असौ निःश्वास उच्छ्वसित आननः निचितं चिंतयामास. ॥ २५ ॥

अर्थः—ए रीते सर्व जगोए सर्व लोकोथी अत्यंत संताप पामेलो ते संवर निःश्वासोथी सूजेला (झांखा) मुखवाळो थयोथको कंटाळीने विचारवा लाग्यो के, ॥ २५ ॥

**धन्या वन्या मृगास्तेऽपि पक्षिणस्तेऽपि दक्षिणाः । विशन्त्यपि न ये कर्मदानवे मानवे जने ॥ २६ ॥**

अन्वयः—ते वन्याः मृगाः अपि धन्याः, ते पक्षिणः अपि दक्षिणाः, ये कर्म दानवे मानवे जने विशंति अपि न. ॥ २६ ॥

अर्थः—ते वनवासी हरिणो पण भाग्यशाली छे, तथा ( वनमां वसनारा ) ते पक्षिओ पण बुद्धिवानो छे, के जेओ राक्षसी कार्य करनारी मनुष्यजातिना समागममांज आवता नथी. ॥ २६ ॥

**अहमप्यहते स्थाने मानवैर्यामि सर्वथा । इति ध्यायन्नयं क्वापि कान्तारे सत्वरं ययौ ॥ २७ ॥**

अन्वय-अहं अपि सर्वथा मानवैः अहते स्थाने यामि, इति ध्यायन् अयं सत्वरं क्व अपि कांतारे ययौ. ॥ २७ ॥

अर्थः—( माटे ) हुं पण बीलकुल मनुष्योनी हस्तोविनाना स्थानमां जाउं, एम विचारी ते संवर एकदम कोइक उज्जड जंगलमां चाल्यो गयो. ॥ २७ ॥

**त्यक्तजातिविरोधेन जातबोधेन साश्रुणा । मृगवर्गेण संवर्ग्यमाणपर्यन्तभूतलः ॥ २८ ॥**

**अमुना शमिनां मध्ये सिद्धसेनो मुनीश्वरः । स्वाध्यायध्वनिमाधुर्यवश्यविश्वो व्यलोक्यत ॥ २९ ॥**

अन्वयः-त्यक्त जाति विरोधेन, जात बोधेन, साश्रुणा मृगवर्गेण संवर्ग्यमाण पर्यंत भूतलः, ॥ २८ ॥ स्वाध्याय ध्वनि माधुर्य वश्य विश्वः, शमिनां मध्ये सिद्धसेनः मुनीश्वरः अमुना व्यलोक्यत. ॥ २९ ॥ युग्मं ॥

अर्थः—तजेल छे जातिवैर जेणे, बोध पामेला, तथा ( आंखोमां ) अश्रुओवाळा एवा हरिणोनो समूह जेनी आसपासनी जमीनपर गोठवाइने बेशी गयो छे, एवा, ॥ २८ ॥ तथा स्वाध्यायनी ध्वनिनी मीठाशथी वश थयेल छे जगत जेने एवा, अने मुनिओनी वच्चे बेठेला, एवा श्रीसिद्धसेन नामना मुनिराजने तेणे जोया. ॥ २९ ॥ युग्मं ॥

**आगच्छागच्छ वत्स त्वमिति तं यतिनां पतिः । वर्णैः कर्णैकपीयूषगण्डूषैः स्वयमाह्वयत् ॥ ३० ॥**

अन्वयः-(हे) वत्स ! त्वं आगच्छ ? आगच्छ ? इति यतिनां पतिः स्वयं कर्ण एक पीयूष गंडूषैः वर्णैः तं आह्वयत्. ॥ ३० ॥

अर्थः-हे वत्स ! तुं आव ? आव ? ए रीते ते मुनिराजे पोते कर्णोमां एक अमृतना कोगळासरखा अक्षरोवडे तेने बोलाव्यो.

**अहो उक्तिरपूर्वास्य ध्यात्वेति पदयोर्यतेः । स निपत्य पराभूतः सुतः पितुरिवारुदत् ॥ ३१ ॥**

अन्वयः-अहो ! अस्य उक्तिः अपूर्वा, इति ध्यात्वा पराभूतः सुतः पितुः इव यतेः पदयोः निपत्य सः अरुदत्. ॥ ३१ ॥

अर्थः-अहो ! आ मुनिराजनी वाणी अपूर्व छे ! एम विचारीने पराभव पामेलो पुत्र जेम पितापासे, तेम ते मुनिराजना चरणोमां पडीने ते रडवा लाग्यो. ॥ ३१ ॥

**संभाष्य मुनिना पृष्टः संनिकृष्टफलोदयः । अथाचष्ट निजं कष्टचरितं परितोऽपि सः ॥ ३२ ॥**

अन्वयः-अथ मुनिना संभाष्य पृष्टः संनिकृष्ट फल उदयः सः निजं परितः अपि कष्ट चरितं आचष्ट. ॥ ३२ ॥

अर्थः-पछी ते मुनिराजे मिष्ट वचनोवडे बोलावीने पूछवाथी नजीक छे फलनो उदय जेनो एवा ते संवरे (पोतानुं) सर्वथा प्रकारे दुःखदाइ चरित्र कही संभळाव्युं. ॥ ३२ ॥

**अथादिशदसौ साधुस्तमुद्दिश्य दयाशयः । प्रीणयन्सर्वसत्त्वानि तथ्यैककवचं वचः ॥३३ ॥**

अन्वयः—अथ दयाशयः असौ साधुः सर्व सत्त्वानि प्रीणयन् तं उद्दिश्य तथ्य एक कवचं वचः आदिशत्. ॥ ३३ ॥

अर्थः—पछी दयाना स्थानरूप एवा ते साधुए सर्व जीवोने खुशी करतां थकां ते संवरने उद्देशीने सत्यनाज एक बखतर सरखुं वचन कह्युं के, ॥ ३३ ॥

**कियन्मात्रमिदं दुःखमत्र तेऽस्ति नृजन्मनि । सहन्तेऽमो यथात्मानोऽनन्तं दुःखं तथा शृणु ॥ ३४ ॥**

अन्वयः-अत्र नृजन्मनि ते इदं दुःखं कियन्मात्रं अस्ति ? अमी आत्मानः यथा अनंतं दुःखं सहंते, तथा शृणु ? ॥ ३४ ॥

अर्थः—आ मनुष्यजन्ममां तारुं आ दुःख शुं हिसाबमां छे ? आ जीवो जे अनंतां दुःखो सहन करे छे, ते तुं सांभळ ? ॥ ३४ ॥

**कषायविषयासक्तः सक्तः प्राणिवधादिषु । तदर्जयति दुःकर्म येन जन्तुर्भवान्तरे ॥ ३५॥**

**भेदनच्छेदनोत्तप्तत्रपुपानासिपत्रजैः । क्षेत्रजैश्च महादुःखै पीड्यते नरकेष्वसौ ॥ ३६ ॥ युग्मम् ॥**

अन्वयः—कषाय विषय आसक्तः, प्राणिवध आदिषु सक्तः जंतुः तत् दुःकर्म अर्जयति, येन भवांतरे ॥ ३५ ॥ असौ नरकेषु भेदन, च्छेदन, उत्तप्त त्रपुपान, असिपत्रजैः, च क्षेत्रजैः महादुःखैः पीड्यते. ॥ ३६ ॥ युग्मं ॥

अर्थः-कषायो अने विषयोमां आसक्त थयेलो, तथा जीवहिंसा आदिक पापोमां लीन थयेलो प्राणी एवुं तो दुष्कर्म उपार्जन करे छे, के, जेथी भवांतरमां, ॥ ३५ ॥ ते प्राणी नरकोनी अंदर, भेदन, छेदन, तपावेलां सीसानुं पान, तथा तलवारना विदारणथी उत्पन्न थयेलां, तेमज क्षेत्रसंबंधि महान दुःखोवडे पीडित थाय छे. ॥ ३६ ॥ युग्मं ॥

लब्धतिर्यग्भवोऽप्येष जलस्थलनभोगतिः । व्यथ्यतेऽत्यर्थमात्मायमौष्णशीतानिलानलैः ॥ ३७ ॥

अन्वयः-लब्ध तिर्यग्भवः, जल स्थल नभः गतिः अपि एष अयं आत्मा औष्ण शीत अनिल अनलैः अत्यर्थं व्यथ्यते. ॥३७॥

अर्थः-तिर्यंचनो भव पामेलो, तथा जल, पृथ्वी अने आकाशमां गमन करनारो, एवो पण ते आ जीव गरमी, ठंडी, वायु तथा अग्निवडे अत्यंत पीडा पामे छे. ॥ ३७ ॥

मर्त्यत्वेऽपि महारोगनैःस्व्यदास्यवियोगजैः । दुःखैर्दंदह्यते जन्तुर्नारकप्रतिहस्तकैः ॥ ३८ ॥

अन्वयः-मर्त्यत्वे अपि जंतुः नारक प्रतिहस्तकैः महारोग नैःस्व्य दास्य वियोगजैः दुःखैः दंदह्यते. ॥ ३८ ॥

अर्थः-मनुष्यभवमां पण प्राणी नारकीजेवांज मोटा रोगो, निर्धनता, नोकरी तथा वियोगथी उत्पन्न थयेलां दुःखोवडे बळतोज रहेछे.

किल्बिषकिंकराल्पर्धिभावात्क्रुद्धेन्द्रवज्रतः । युद्धेर्ष्याच्च्यवनाज्जीवो देवत्वेऽपि न सौख्यभाक् ॥३९॥

अन्वयः—देवत्वे अपि जीवः किल्बिष किंकर अल्प ऋद्धि भावात्, क्रुद्ध इन्द्र वज्रतः, युद्ध ईर्ष्या च्यवनात् सौख्यभाक् न.
अर्थः—देवभवमां पण जीव किल्बिष एटले हलकी जातिना देवपणाथी, नोकरपणाथी, तथा अल्प समृद्धिपणाथी क्रोध पामेला इन्द्रना वज्रथी, युद्धथी, (परस्परनी) अदेखाइथी, तथा च्यवनपणाथी सुखी होइ शकतो नथी. ॥ ३९ ॥

**एवं कर्मविपाकोऽस्मिन्भवे जीवान्कदर्थयेत् । लक्ष्यन्तेऽस्य फलान्येव न स्वरूपं जनैर्यतः ॥ ४० ॥**

अन्वयः—एवं कर्म विपाकः अस्मिन् भवे जीवान् कदर्थयेत्, यतः जनैः अस्य फलानि एव लक्ष्यंते, स्वरूपं न. ॥ ४० ॥
अर्थः—एरीते कर्मोनो विपाक आ भवमां जीवोने दुःख आपे छे, केमके लोको ते कर्मविपाकना फलनेज जाणे छे, परंतु तेनुं स्वरूप जाणता नथी. ॥ ४० ॥

**माहात्म्यं ध्यानयोगानां सामर्थ्यं परमात्मनाम् । विपाकं कर्मणां वेत्ति न सर्वज्ञं विनापरः ॥ ४१ ॥**

अन्वयः—ध्यान योगानां माहात्म्यं, परमात्मनां सामर्थ्यं, कर्मणां विपाकं सर्वज्ञं विना अपरः न वेत्ति. ॥ ४१ ॥
अर्थः-ध्यान अने योगोना माहात्म्यने, परमात्मोना सामर्थ्यने, अने कर्मोना विपाकने केवलीविना बीजो कोइ जाणी शकतो नथी.

**अमुं कर्मविपाकं तु शुभीकर्तुमिहोद्यतः । एक एवास्ति सद्धर्मः शिवशर्मनिबन्धनम् ॥ ४२ ॥**

अन्वयः—तु अमुं कर्म विपाकं शुभी कर्तुं इह शिव शर्म निबंधनं एकः सद्धर्मः एव उद्यतः अस्ति. ॥ ४२ ॥
अर्थः-वळी कर्मोना आ विपाकने शुभरूप करवा माटे अहीं मोक्षसुखना कारणरूप एवो एक उत्तम धर्मज उद्यमवंत थयेलो छे.

विनामुना तु धर्मेण जन्तुः कर्माख्यवैरिभिः । पात्यते तेषु दुःखेषु येषां त्वद्दुःखमञ्चलः ॥ ४३ ॥

अन्वयः—तु अमुना धर्मेण विना कर्म आख्य वैरिभिः जंतुः तेषु दुःखेषु पात्यते येषां त्वत् दुःखं अंचलः. ॥ ४३ ॥

अर्थः—वळी आ धर्मविना कर्म नामना शत्रुओ प्राणीने एवां तो ( असह्य ) दुःखोमां पाडे छे, के जेमां (आ) तारुं दुःख तो एक चींथरा सरखुं छे. ॥ ४३ ॥

परं नैवाचरन्त्येते मूढास्तत्किंचन क्वचित् । येन क्षिपन्ति दुःकर्मबीजं तद्दुःखभूरुहाम् ॥ ४४ ॥

अन्वयः—परं एते मूढाः क्वचित् तत् किंचन न आचरंति, येन तद् दुःखभूरुहां दुःकर्म बीजं क्षिपंति. ॥ ४४ ॥

अर्थः—परंतु आ मूढ प्राणीओ कोइ पण समये ते धर्मनुं लेश मात्र पण आचरण करता नथी, के जे धर्मवडे करीने ते दुःखरूपी वृक्षोनां दुष्कर्मरूपी बीजने (दूर) फेंकी शके. ॥ ४४ ॥

अथ प्रभूतदुःकर्माभिभूतः संवरो गुरून् । करौ किरीटतां नीत्वा पप्रच्छातुच्छवाञ्छनः ॥ ४५ ॥

अन्वयः—अथ प्रभूत दुःकर्म अभिभूतः, अतुच्छ वांछनः संवरः करौ किरीटतां नीत्वा गुरून् पप्रच्छ. ॥ ४५ ॥

अर्थः—हवे घणां दुष्कर्मोथी पराभव पामेलो, तथा म्होटी आशावाळो ते संवर ( बन्ने ) हाथोने मुकुटरूप करीने ( जोडीने ) गुरुमहाराजने पूछवा लाग्यो के, ॥ ४५ ॥

प्रभो प्रभवति प्रायः कोऽप्युपायः स किं क्वचित् । येन स्याद्द्विषतामन्तो हन्त दुःकर्मणामपि ॥ ४६ ॥

अन्वयः-हे प्रभो ! प्रायः सः कः अपि उपायः किं क्वचित् प्रभवति ? येन हंत दुःकर्मणां द्विषतां अपि अंतः स्यात्. ॥४६॥

अर्थः—हे भगवान् ! प्रायें करीने एवो पण कोइ उपाय शुं क्यांय छे ? के जेथी अरेरे ! ( आवां ) दुष्कर्मोरूपी शत्रुओनो पण नाश थइ शके. ॥ ४६ ॥

अथाभ्यधात्सुधापूरसोदरीं स गुरुर्गिरम् । तप एवास्ति दुःकर्ममर्मनिर्मथनिष्ठुरम् ॥ ४७ ॥

अन्वयः—अथ गुरुः सुधा पूर सोदरीं गिरं अभ्यधात्, तप एव दुःकर्म मर्म निर्मथ निष्ठुरं अस्ति. ॥ ४७ ॥

अर्थः-त्यारे गुरुमहाराज अमृतना प्रवाहसरखी वाणी बोल्या के, फक्त एक तपज (तेवां) दुष्कर्मोना मर्मस्थानोने तोडीपाडवामां समर्थ छे ॥ ४७ ॥

धत्ते तदपि तीव्रत्वमङ्ग निःसङ्गताभृताम् । निःसङ्गता तु दीक्षाया दाक्षिण्येन यदि स्थिरा ॥ ४८ ॥

अन्वयः—-अंग तत् अपि निःसंगता भृतां तीव्रत्वं धत्ते, निःसंगता तु यदि दीक्षायाः दाक्षिण्येन स्थिरा. ॥४८ ॥

अर्थः-वळी ते तप पण ( सांसारिक ) मनुष्योए संगरहित करेलो तीव्रपणुं धारण करी शके छे, अने ते निःसंगपणुं पण दीक्षानी कृपाथीज स्थिर थाय छे. ॥ ४८ ॥

चेतसो निश्चलत्वेन प्राप्यते सा महाशयैः । कर्मदावानलज्वालाविध्यापनघनाघनः ॥ ४९ ॥

अन्वयः—कर्म दावानल ज्वाला विध्यापन घनाघनः सा महाशयैः चेतसः निश्चलत्वेन प्राप्यते. ॥ ४९ ॥

अर्थः—कर्मोरूपी दावानलनी ज्वालाओने ठारवामां वरसाद सरखी ते दीक्षाने गंभीर हृदयवाळा मनुष्यो मननी स्थिरताथी मेळवी शके छे. ॥ ४९ ॥

इति श्रुत्वाथ तत्वार्थं सत्त्वभाक्संनिधौ गुरोः । साग्रहः सोऽग्रहीद्दीक्षां संमदी क्षान्तितत्परः ॥ ५० ॥

अन्वयः—अथ इति तत्त्वार्थं श्रुत्वा सत्त्वभाक्, क्षांतितत्परः संमदी सः साग्रहः गुरोः संनिधौ दीक्षां अग्रहीत्. ॥ ५० ॥

अर्थः–पछी ए रीतनो तात्विक भावार्थ सांभळीने पराक्रमी, क्षमा राखवामां तत्पर थयेला, तथा आनंद पामेला एवा ते संवरे आग्रहसहित गुरुमहाराजपासे दीक्षा लीधी. ॥ ५० ॥

सिद्धान्ताध्ययनोद्रेकाद्विवेकाञ्चितचेतनः । तपः कपटनिर्मुक्तमारेभे संवरो मुनिः ॥ ५१ ॥

अन्वयः—सिद्धांत अध्ययन उद्रेकात् विवेक अंचित चेतनः संवरः मुनिः कपट निर्मुक्तं तपः आरेभे. ॥ ५१ ॥

अर्थः–आगमोना अभ्यासना उमळकाथी (उत्पन्न थयेला) विवेकथी शोभितां हृदयवाळा ते संवरमुनि निष्कपटपणे तप करवा लाग्या.

असौ सद्धर्मचातुर्यस्तुर्यषष्ठाष्टमैर्व्यधात् । तपोभारैः शरासारैर्जर्जरं कर्मपञ्जरम् ॥ ५२ ॥

अन्वयः—सद्धर्म चातुर्यः असौ तुर्य षष्ट अष्टमैः तपोभरैः शर आसारैः कर्म पंजरं जर्जरं व्यधात्. ॥ ५२ ॥

अर्थः—उत्तम धर्मनी चतुराइवाळा ते संवरमुनि उपवास, छठ तथा अट्ठमना तपसमूहरूपी बाणोना वरसादथी कर्मोरूपी पांजरांने खोखरुं करवा लाग्या. ॥ ५२ ॥

पुरिमाधमेकभक्तं नैर्विकृत्यं च कृत्यवित्। आचाम्लमुपवासं च सेवमानः प्रतीन्द्रियम् ॥ ५३ ॥
दिवसैः पञ्चविंशत्या जितेन्द्रियशिरोमणिः। स इन्द्रियजयं नाम तपश्चक्रे यथाविधि ॥ ५४ ॥युग्मम्॥

अन्वयः—च प्रति इंद्रियं पुरिमाधं, एकभक्तं, नैर्विकृत्यं, आचाम्लं, च उपवासं सेवमानः कृत्यवित्, ॥ ५३ ॥ जित इंद्रिय शिरोमणिः सः पंचविंशत्या दिवसैः इंद्रियजयं नाम तपः यथाविधि चक्रे. ॥ ५४ ॥ युग्मं ॥

अर्थः—वळी दरेक इंद्रियने अपेक्षीने, पुरिमढ, एकटाणुं, नीवी, आंबेल तथा उपवास करता, तथा कार्यने जाणनारा, ॥ ५३ ॥ अने जितेंद्रियोमां शिरोमणि एवा ते संवरमुनिए पचीस दिवसोए "इंद्रियजय" नामनो तप विधिपूर्वक (संपूर्ण) कर्यो. ॥ ५४ ॥

एकभक्तं नैर्विकृत्यमाचाम्लं भक्तवर्जनम्। एवं षोडशभिर्घस्त्रैः च कषायजयं व्यधात् ॥ ५५ ॥

अन्वयः-एकभक्तं, नैर्विकृत्यं, आचाम्लं, भक्तवर्जनं, एवं षोडशभिः घस्त्रैः सः कषायजयं व्यधात्. ॥ ५५ ॥

अर्थः—एकटाणुं, नीवीइ, आंबेल, तथा उपवास, एम शोळ दिवसोसुधी करीने तेणे "कषाय जय" नामनो तप कर्यो. ॥५५॥

निर्विकृतिकमाचाम्लमभक्तं विदधन्मुनिः । योगानां शुद्धये योगशुद्धिं नवदिनैर्व्यधात् ॥ ५६ ॥

अन्वयः—योगानां शुद्धये निर्विकृतिकं आचाम्लं, अभक्तं नव दिनैः विदधन् मुनिः योगशुद्धिं व्यधात्. ॥ ५६ ॥

अर्थः—(मनवचन कायाना) योगोनी शुद्धिमाटे नीवी, आंबेल, तथा उपवास एम नव दिवसोसुधी करीने ते संवरमुनिए "योगशुद्धि" नामनो तप कर्यो. ॥ ५६ ॥

अभक्तमेकाशनकमेकसिक्थकमप्यथ । एकस्थानमेकदत्तिं विकृत्या रहितं ततः ॥ ५७ ॥
आचाम्लमष्टकवलमित्येकैकस्य कर्मणः । हृतौ तपो व्यधादष्टकर्मसूदनमेव सः ॥ ५८ ॥ युग्मम् ॥

अन्वयः–अथ अभक्तं, एकाशनकं, एकसिक्थकं अपि एक स्थानं, ततः विकृत्या रहितं एकदत्तिं, ॥ ५७ ॥ आचाम्लं, अष्टकवलं, इति एकैकस्य कर्मणः हृतौ सः अष्टकर्मसूदनं एव तपः व्यधात्. ॥ ५८ ॥ युग्मं ॥

अर्थः—वळी उपवास, एकासणुं, एकसिक्थ, तथा एकलठाणुं, पछी विगइ रहित नीवीइ, एकदत्ति, ॥ ५७ ॥ आंबेल, अने आठ कोळीया, एम एक एक कर्मना विनाशमाटे ते संवरमुनिए " अष्ट कर्म सूदन " (आठे कर्मोनो नाश करनारो) तप कर्यो. ॥५८॥

ज्ञानस्य दर्शनस्यापि चारित्रस्य च सेवनम् । चक्रे निरन्तरं साधुरुपवासैस्त्रिभिस्त्रिभिः ॥ ५९ ॥

अन्वयः–च साधुः निरंतरं त्रिभिः त्रिभिः उपवासैः ज्ञानस्य, दर्शनस्य, च चारित्रस्य अपि सेवनं चक्रे. ॥ ५९ ॥

अर्थः-वळी ते संवर साधुए अंतररहित त्रण त्रण उपवासोवडे, ज्ञाननुं, दर्शननुं अने चारित्रनुं पण आराधन कर्युं. ॥ ५९ ॥

**शुक्लास्वेकादशीष्वेकादशसंख्यासु सोऽकरोत् । मौनोपवासकरणैः श्रुतदेवीतपः शुभम् ॥ ६० ॥**

अन्वयः—एकादश संख्यासु शुक्लासु एकादशीसु मौन उपवास करणैः सः शुभं श्रुतदेवी तपः अकरोत्. ॥ ६० ॥

अर्थः—( वळी ) शुक्ल पक्षनी अग्यार अग्यारसोने दिवसे मौन धारण करवा पूर्वक उपवासो करीने ते संवर मुनिए श्रुतदेवीना आराधननो शुभ तप कर्यो. ॥ ६० ॥

**शुक्लपक्षेऽष्टभिरुपवासैराचाम्लपारणैः । दिनैः षोडशभिः सोऽधात्तपः सर्वाङ्गसुन्दरम् ॥ ६१ ॥**

अन्वयः-शुक्लपक्षे अष्टभिः उपवासैः, आचाम्ल पारणैः, षोडशभिः दिनैः सः " सर्वांग सुंदरं तपः " अधात्. ॥ ६१ ॥

अर्थः-वळी शुक्ल पक्षमां आठ उपवास, तथा ते दरेक उपवासने पारणे आंबेल, एम शोळ दिवसो सुधीमां तेमणे " सर्वांग सुन्दर " नामनो तप कर्यो. ॥ ६१ ॥

**इत्येतत्कृष्णपक्षे तु ग्लानपालनलालसः । सोऽकार्षीद्विषयद्वेषी नीरुक्सिंहाभिधं तपः ॥ ६२ ॥**

अन्वयः-तु कृष्णपक्षे इति एतत्, ग्लान पालन लालसः, विषयद्वेषी सः " नीरुक् सिंहाभिधं " तपः अकार्षीत् ॥ ६२ ॥

अर्थः-वळी कृष्ण पक्षमां उपर कह्या मुजबज, ग्लान साधुनी वैयावच्छ करवानी इच्छा पूर्वक, विषयोना द्वेषी एवा ते संवरमुनिए " नीरुक् सिंह " नामनो तप कर्यो. ॥ ६२ ॥

मुनिर्द्वात्रिंशदाचाम्लैरेकान्तरितपारणैः । विदधे शुद्धबोधोऽयं तपः परमभूषणम् ॥ ६३ ॥

अन्वयः—एकांतरित पारणैः द्वात्रिंशत् आचाम्लैः शुद्ध बोधः अयं मुनिः "परम भूषणं" तपः विदधे. ॥ ६३ ॥

अर्थः—वळी एकांतरे पारणु करवापूर्वक बत्रीस आंबेलो करीने निर्मल बोधवाळा आ संवरमुनिए "परम भूषण" नामनो तप कर्यो.

अङ्गान्येकादशाप्येष पूर्वाणि च चतुर्दश । द्विधा चन्द्रायणं न्यूनोदरतादितपो व्यधात् ॥ ६४ ॥

अन्वयः—एकादश अपि अंगानि, च चतुर्दश पूर्वाणि, द्विधा चंद्रायणं, न्यून उदरता आदि तपः व्यधात्. ॥ ६४ ॥

अर्थः—वळी ते मुनिए अग्यार अंगोनो, चौदपूर्वोनो बे प्रकारनो चंद्रायण तप तथा ऊनोदरीआदिक तपो कर्या. ॥ ६४ ॥

अथैका प्रतिपद्द्वे च द्वितीये तिथयोऽखिलाः । यावत्पञ्चदश ज्ञेयाः पूर्णमास्यो निरन्तरम् ॥ ६५ ॥
उपवासैर्विशुद्धाः स्युर्यत्र तत्तप उज्ज्वलम् । व्यातेने मुनिना सर्वसौख्यसंपत्तिनामतः ॥ ६६ ॥युग्मम्॥

अन्वयः—अथ एका प्रतिपद् च द्वे द्वितीये, यावत् पंचदश पूर्णमास्यः अखिलाः तिथयः निरंतरं ज्ञेयाः, ॥ ६५ ॥ यत्र उपवासैः विशुद्धाः स्युः, तत् "सर्व सौख्य संपत्ति" नामतः उज्ज्वलं तपः मुनिना व्यातेने. ॥ ६६ ॥ युग्मं ॥

अर्थः—पछी एक एकम, तथा बे बीज, (त्रण त्रीज, चार चोथ) एम छेक पंदर पुनमसुधीनी सघळी तिथिओ निरंतर जाणवी, ॥ ६५ ॥ ए रीतनी सर्व तिथिओए उपवासो करीने तेओने जे तपमां निर्मल करवामां आवे छे, एवो "सर्व सौख्य संपत्ति" नामनो उज्ज्वल तप ते संवरमुनिए कर्यो. ॥ ६६ ॥ युग्मं ॥

जिनानां नव पद्मानि प्रतिपद्मं निरन्तरैः । उपवासैस्तु सोऽष्टाभिश्चक्रे पद्मोत्तरं तपः ॥ ६७ ॥

अन्वयः—जिनानां नव पद्मानि, प्रतिपद्मं निरंतरैः अष्टाभिः उपवासैः सः तु "पद्मोत्तरं" तपः चक्रे. ॥ ६७ ॥

अर्थः—जिनेश्वरप्रभुनां ( देवनिर्मित ) नव कमलो होय छे, तेमाना दरेक कमळने उद्देशीने अंतररहित आठआठ उपवासोवडे करीने ते संवरमुनिए "पद्मोत्तर" नामे तप कर्यो. ॥ ६७ ॥

पञ्चसप्तत्युपवासैः पञ्चविंशतिपारणैः । भद्रनाम तपश्चक्रे स वक्रेतरचेतसा ॥ ६८ ॥

अन्वयः-वक्र इतर चेतसा सः पंचसप्तति उपवासैः, पंचविंशति पारणैः "भद्र" नाम तपः चक्रे ॥ ६८ ॥

अर्थः-वळी सरलचित्तथी ते संवरमुनिए पींचोतेर उपवास, तथा पचीस पारणाओवडे "भद्र" नामनो तप कर्यो. ॥ ६८ ॥

षण्णवत्या शतेनोपवासैः सद्धर्मवासनः । स महाभद्रमेकोनपञ्चाशत्पारणैर्व्यधात् ॥ ६९ ॥

अन्वयः-सद्धर्म वासनः सः शतेन षण्णवत्या उपवासैः एकोन पंचाशत् पारणैः "महाभद्रं" व्यधात्. ॥६९॥

अर्थः—उत्तम धर्मनी वासनावाळा ते संवरमुनिए एकसो छन्नु उपवास तथा ओगणपचास पारणाओवडे "महाभद्र" नामनो तप कर्यो. ॥ ६९. ॥

उपवासैरसौ पञ्चसप्तत्या च शतेन च । पारणैः पञ्चविंशत्याभजद्भद्रोत्तरं तपः ॥ ७० ॥

अन्वयः—च असौ शतेन च पंच सप्तत्या उपवासैः, पंचविंशत्या पारणैः "भद्रोत्तरं" तपः अभजत्. ॥ ७० ॥
अर्थः—वळी ते संवरमुनिए एकसो पींचोतेर उपवासोवडे, तथा पचीस पारणाओवडे "भद्रोत्तर" नामनो तप कर्यो. ॥ ७० ॥

द्विनवत्यधिकेनोपवासानां त्रिशतेन सः । सर्वतोभद्रमेकोनपञ्चाशत्पारणैर्व्यधात् ॥ ७१ ॥

अन्वयः—सः द्विनवत्यधिकेन उपवासानां त्रिशतेन, एकोन पंचाशत्पारणैः "सर्वतोभद्रं" व्यधात्. ॥ ७१ ॥
अर्थः-( वळी ) ते संवरमुनिए त्रणसो बाणु उपवास, तथा ओगणपचास पारणाओवडे "सर्वतो भद्र" नामनो तप कर्यो. ७१

षष्ठेनादौ ततः षष्ट्या ह्युपवासैरनारतम् । एकान्तरैर्मुनिर्धर्मचक्रवालं तपोऽतनोत् ॥ ७२ ॥

अन्वयः—आदौ षष्ठेन, ततः अनारतं एकांतरैः षष्टया उपवासैः मुनिः "धर्म चक्रवालं" तपः अतोनत् ॥ ७२ ॥
अर्थः—प्रथम छठ, अने पछी एकीहारे एकांतरीया साठ उपवासोवडे करीने ते मुनिए "धर्मचक्रवाल" नामनो तप कर्यो. ७२

आचाम्लैरुपवासान्तैरेकाद्येकैकवर्धितैः । शतसंख्यैः स आचाम्लवर्धमानं व्यधात्तपः ॥ ७३ ॥

अन्वयः-एक आदि एक वर्धितैः उपवास अंतैः शतसंख्यैः आचाम्लैः सः "आचाम्ल वर्धमानं" तपः व्यधात्. ॥ ७३ ॥
अर्थः—एकथी मांडीने एक एकनी वृद्धिवाळा, अने छेल्लुं छेल्लुं उपवासवाळा, एवां एकसो आंबेलोवडे करीने ते मुनिए "आचाम्ल वर्धमान" नामनो तप कर्यो. ॥ ७३ ॥

तच्चतुर्दश वर्षाणि त्रिमासीं दिनविंशतिम् । तपः तन्वन्नसौ चक्रे कृशमङ्गं च कर्म च ॥ ७४ ॥

अन्वयः—चतुर्दश वर्षाणि, त्रिमासीं दिन विंशतिं तत् तपः तन्वन् असौ अंगं च कर्म च कृशं चक्रे. ॥ ७४ ॥

अर्थः–चौद वर्षो, त्रण मास अने वीस दिवसोसुधी ते " आचाम्लवर्धमान " नामनो तप करीने ते मुनिए पोताना शरीरने तथा कर्मोने पण क्षीण करी नाख्यां. ॥ ७४ ॥

**एकदासौ नमस्कृत्य शुभकृत्यप्रकाशकम् । द्वादशभिक्षुप्रतिमावहने पृष्टवान्गुरुम् ॥ ७५ ॥**

अन्वयः–एकदा असौ शुभकृत्य प्रकाशकं गुरुं नमस्कृत्य द्वादश भिक्षु प्रतिमा वहने पृष्टवान्. ॥ ७५ ॥

अर्थः–एक दिवसे ते संवरमुनिए शुभ कार्यो बतावनारा गुरुमहाराजने वांदीने मुनिनी बार प्रतिमाओ वहन करवामाटे पूछयुं.

**दशपूर्वधरो धीरः सारसंहननः शमी । तदसौ योग्य एवास्य दुःकरस्यापि कर्मणः ॥ ७६ ॥**

अन्वयः—असौ दश पूर्वधरः, धीरः, सार संहननः, तत् दुःकरस्य अपि अस्य कर्मणः योग्यः एव. ॥ ७६ ॥

अर्थः–आ संवरमुनि दशपूर्वधारी, धैर्यवान, तथा मजबूत शरीरवाळा छे, तेथी अति मुश्केल एवां पण आ कार्यमाटे ते योग्यजछे,

**इति ध्यात्वा चिरं सिद्धसेनाचार्यस्तमादिशत् । वत्सायमुचितोऽर्थस्ते तद्विधेहि समीहितम् ॥ ७७ ॥**

अन्वयः–इति चिरं ध्यात्वा सिद्धसेन आचार्यः तं आदिशत्, हे वत्स ! अयं अर्थः ते उचितः, तत् समीहितं विधेहि ? ॥७७॥

अर्थः—एम घणा वखत सुधी विचारीने सिद्धसेन आचार्यजीए तेमने कह्युं के, हे वत्स ! ते कार्य तमारेमाटे लायक छे, माटे इच्छामुजब करो ? ॥ ७७ ॥

तदा मुदा गुरून्नत्वानुज्ञाप्य च गणं क्षणात् । गच्छान्निष्क्रम्य तेनाथ प्रारेभे प्रतिमादिमा ॥ ७८ ॥

अन्वयः-अथ तदा गुरून् नत्वा, च गणं अनुज्ञाप्य, गच्छात् निष्क्रम्य तेन मुदा आदिमा प्रतिमा प्रारेभे. ॥ ७८ ॥

अर्थः—पछी तेज वखते गुरुमहाराजने वांदीने, तथा मुनि गणनी रजा लेइने, अने गच्छमांथी निकळीने ते मुनिए हर्षथी पेहेली प्रतिमानो प्रारंभ कर्यो. ॥ ७८ ॥

एकैकां भोजने पाने दत्तिं गृह्णात्यसौ मुनिः । यावन्मासं ततः पूर्णे मासे गच्छेऽविशत्पुनः ॥ ७९ ॥

अन्वयः—असौ मुनिः यावत् मासं भोजने पाने एकैकां दत्तिं गृह्णाति, मासे पूर्णे पुनः गच्छे अविशत्. ॥ ७९ ॥

अर्थः-ते संवरमुनि एक माससुधी आहारनी तथा पाणीनी एकेकी दत्ति ग्रहण करता हता, तथा (एरीते) एक मास संपूर्ण थया-बाद ते पाछा गच्छमां दाखल थया. ॥ ७९ ॥

एवं स दत्तेर्मासस्य वृद्धिमेकैकशोऽकरोत् । तावद्यावदियं सप्तमासैरजनि सप्तमी ॥ ८० ॥

अन्वयः-एवं सः एकैकशः दत्तेः मासस्य तावत् वृद्धिं अकरोत्, यावत् सप्त मासैः इयं सप्तमी अजनि. ॥ ८० ॥

अर्थः—एवी रीते ते मुनिए एकेक दत्तिनी, तथा एकेक मासनी त्यांसुधी वृद्धि करी, के ज्यांसुधीमां सात मासोवडे आ सातमी प्रतिमा पूर्ण थइ. ॥ ८० ॥

एकान्तरोपवासैश्च विहिताचाम्लपारणैः । पानाहारोज्झितैर्ग्रामाद्बहिरुत्तानशायिना ॥ ८१ ॥

निःप्रकम्पेन सर्वोपसर्गवर्गसहिष्णुना । अष्टमी प्रतिमा सप्ताहोरात्रैर्विदधेऽमुना ॥ ८२ ॥ युग्मम् ॥

अन्वयः--च विहित आचाम्ल पारणैः, पान आहार उज्झितैः, एकांतर उपवासैः, ग्रामाद् बहिः उत्तान शायिना, ॥ ८१ ॥ निःप्रकंपेन, सर्व उपसर्ग सहिष्णुना अमुना सप्त अहोरात्रैः अष्टमी प्रतिमा विदधे. ॥ ८२ ॥ युग्मं ॥

अर्थः—वळी आंबेलना पारणावाळा, पाणी पीवा विनाना, एवा एकांतरीया उपवासोवडे करीने, गामनी बहार चत्ता सूइने, ॥ ८१ ॥ कंप्याविना सर्वे उपसर्गो सहन करीने, ते संवरमुनिराजे सात रात्रिदिवसोवडे आठमी प्रतिमा संपूर्ण करी. ॥ ८२ ॥

इत्थं निष्ठागरिष्ठेन प्रतिमा सप्तभिर्दिनैः । उत्कटिकासनस्थेन तेन तेने नवम्यपि ॥ ८३ ॥

अन्वयः—निष्ठा गरिष्ठेन तेन इत्थं उत्कटिक आसन स्थेन सप्तभिः दिनैः नवमी अपि प्रतिमा तेने. ॥ ८३ ॥

अर्थः—नियम पाळवामां उत्कृष्ट एवा ते मुनिराजे उपर कहेली विधिमुजबज गोदोहिका आसने रहीने सात दिवसोवडे नवमी प्रतिमा पण वहन करी. ॥ ८३ ॥

एवं सप्तदिनैरेव दशमी प्रतिमामुना । चक्रे वीरासनस्थेन सध्ध्यानस्थिरचेतसा ॥ ८४ ॥

अन्वयः—एवं सध्ध्यान स्थिर चेतसा अमुना वीर आसनस्थेन सप्त दिनैः एव दशमी प्रतिमा चक्रे. ॥ ८४ ॥

अर्थः—उपर कहेली विधिमुजबज उत्तम ध्यानमां निश्चल मनवाळा ते मुनिराजे वीर आसने रहीने सात दिवसोवडेज दशमी प्रतिमा वहन करी. ॥ ८४ ॥

कृत्वा षष्ठमहोरात्रं स्थित्वा वीरासने ध्रुवे । प्रतिमैकादशी चक्रे तेन लम्बितपाणिना ॥ ८५ ॥

अन्वयः—षष्ठं कृत्वा, अहोरात्रं ध्रुवे वीरासने स्थित्वा लंबित पाणिना तेन एकादशी प्रतिमा चक्रे. ॥ ८५ ॥

अर्थः—( वळी ) छठ्ठ करीने, तथा रातदहाडो निश्चल वीरआसने रहीने, अने बन्ने हाथो लांबा राखीने ते मुनिराजे अग्यारमी प्रतिमा वहन करी. ॥ ८५ ॥

कृताष्टमः स संकोच्य पादौ लम्बकरः स्थिरः । चक्रे मुक्तिशिलादृष्टिर्द्वादशीमेकरात्रिकीम् ॥ ८६ ॥

अन्वयः—कृत अष्टमः, पादौ संकोच्य लंबकरः, स्थिरः, मुक्ति शिला दृष्टिः सः एक रात्रिकीं द्वादशीं चक्रे. ॥ ८६ ॥

अर्थः-( पछी ) अठ्ठम करीने, बन्ने पग संकोचीने, हाथ लांबा राखीने, निष्कंप रहीने, तथा सिद्धशिलातरफ दृष्टि राखीने ते मुनिए एकरात्रिना परिमाणवाळी बारमी प्रतिमा वहन करी. ॥ ८६ ॥

इत्थं यथोक्तविधिना तप्यमानोऽद्भुतं तपः । विजहार महीपीठे सोऽनल्पैः कल्पकल्पनैः ॥ ८७ ॥

अन्वयः-इत्थं यथोक्त विधिना अद्भुतं तपः तप्यमानः सः अनल्पैः कल्प कल्पनैः महीपीठे विजहार. ॥ ८७ ॥

अर्थः—ए रीते आगमोमां कह्यामुजब विधिपूर्वक आश्चर्यकारो तप तपता एवा ते संवरमुनिराज अनेकप्रकारना साधुआचारोने पाळताथका पृथ्वी तलपर विहार करवा लाग्या. ॥ ८७ ॥

अथैकदा पदाम्भोजद्वयं सूरेरयं मुनिः । प्रणम्य शिरसि न्यस्य पाणी वाणीमिमां जगौ ॥ ८८ ॥

अन्वयः-अथ एकदा अयं मुनिः सूरेः पद अंभोज द्वयं प्रणम्य शिरसि पाणी न्यस्य इमां वाणीं जगौ. ८८ ॥

अर्थः-पछी एक दिवसे ते संवरमुनिराज आचार्यमहाराजना बन्ने चरणकमलोने नमीने, तथा मस्तकपर हाथ जोडीने आवी वाणी बोल्या. ॥ ८८ ॥

**अनन्यदेयसद्धर्मबोधदायक नायक । जिनकल्पकृतेऽनुज्ञां यच्छ योग्योऽस्मि यद्यहम् ॥ ८९ ॥**

अन्वयः—हे अनन्य देय सद्धर्म बोध दायक! हे नायक! यदि अहं योग्यः अस्मि, जिनकल्प कृते अनुज्ञां यच्छ? ॥८९॥

अर्थः—हे अनुपम देवालायक उत्तम धर्मनो बोध देनारा! तथा हे स्वामी! जो हुं लायक होउं, तो ( मने ) जिनकल्पी विहारमाटे आज्ञा आपो! ॥ ८९ ॥

**श्रुतज्ञानाम्बुधिर्जानन्नाराधकममुं गुरुः । आदिशज्जिनकल्पाय मुक्तिश्रीकल्पभूरुहे ॥ ९० ॥**

अन्वयः—श्रुत ज्ञान अंबुधिः गुरुः अमुं आराधकं जानन् मुक्ति श्री कल्प भूरुहे जिनकल्पाय आदिशत्. ॥ ९० ॥

अर्थः—श्रुत ज्ञानना महासागरसरखा गुरु महाराजे ते संवर मुनिराजने आराधक जाणीने, मोक्षलक्ष्मी (मेळववामाटे) कल्पवृक्षसरखा, एवा जिनकल्पी विहारमाटे (तेमने) आज्ञा आपी. ॥ ९० ॥

**अथैष नवतत्त्वज्ञः सत्त्वभाजां शिरोमणिः । लब्धत्रिजगतीराज्यमिवात्मानममन्यत ॥ ९१ ॥**

अन्वयः—अथ नव तत्त्वज्ञः, सत्त्वभाजां शिरोमणिः एषः लब्ध त्रिजगती राज्यं इव आत्मानं अमन्यत. ॥ ९१ ॥

अर्थः—पछी नव तत्त्वोना जाणकार, तथा पराक्रमीओमां अग्रेसर एवा ते मुनिराज, जाणे त्रण जगतनुं राज्य मळ्युं होय नही! तेम पोताने मानवा लाग्या. ॥ ९१ ॥

अथ निर्मलचारित्रो वस्त्रपात्रादिकं मुदा । गुरोः पुरोऽखिलं मुक्त्वा परिपृच्छ्य परिच्छदम् ॥ ९२ ॥
निःससार महासारः सैष सूरेः समीपतः । हन्तुं कर्मततीः कुम्भिपङ्क्तीरिव हरिर्गिरेः ॥९३॥युग्मम्॥

अन्वयः—अथ निर्मल चारित्रः मुदा वस्त्र पात्र आदिकं अखिलं गुरोः पुरः मुक्त्वा, परिच्छदं परिपृच्छ्य, ॥ ९२ ॥ महासारः सः एषः, कुंभि पंक्तीः हंतुं गिरेः हरिः इव, कर्मततीः (हंतुं) सूरेः समीपतः निःससार. ॥ ९३ ॥ युग्मं ॥

अर्थः—पछी निर्मल चारित्रवाळा ते हर्षथी वस्त्र, पात्र आदिक सघळां उपकरणो गुरुमहाराज पासे मूकीने, तथा परिवारनी आज्ञा लइने, ॥ ९२ ॥ महापराक्रमी, एवा ते संवरमुनि, हाथीओनी श्रेणिने मारवामाटे पर्वतमांथी जेम सिंह निकळे, तेम कर्मोनी श्रेणिने (हणवामाटे) आचार्यपासेथी निकळ्या! ॥ ९३ ॥ युग्मं ॥

चरन्मार्गेऽपवर्गस्य वल्गद्विषयतस्करे । तपोधनोऽयमस्तेऽर्के न पदात्पदमप्यदात् ॥ ९४ ॥

अन्वयः—वल्गत् विषय तस्करे अपवर्गस्य मार्गे चरन् अयं तपोधनः अर्के अस्ते पदात् पदं अपि न अदात्. ॥ ९४ ॥

अर्थः—ज्यां विषयोरूपी चोरो भमी रह्या छे, एवा मोक्षमार्गमां विचरता आ तपोधन संवरमुनि, सूर्य अस्त थयाबाद (पोताना) स्थानेथी एक पगलुं पण ( आगळ ) चालता नही. ॥ ९४ ॥

कृतार्द्रवैरः क्रूरेण सह मोहमहीभुजा । तस्थौ नैकत्र कुत्रापि सोऽयमुद्यच्छवौ रवौ ॥ ९५ ॥

अन्वयः-क्रूरेण मोह महीभुजा सह कृतार्द्र वैरः सः अयं उद्यत् छवौ रवौ कुत्र अपि एकत्र न तस्थौ. ॥ ९५ ॥

अर्थः—क्रूर एवा मोहराजासाथे करेल छे दृढ वैर जेणे, एवा ते मुनिराज सूर्य उग्याबाद क्यांयें पण एक स्थानके रहेता नही.

स जाग्रत्कर्मसंग्रामव्यग्रीभूतमना इव । उद्दध्रे पदयोर्भग्नान्नोत्कटानपि कण्टकान् ॥ ९६ ॥

अन्वयः-जाग्रत् कर्म संग्राम व्यग्रीभूत मनाः इव सः पदयोः भग्नान् उत्कटान् कंटकान् अपि न उद्दध्रे. ॥ ९६ ॥

अर्थः—कर्मोरूपी शत्रुओसाथे आदरेली लडाइमांज जाणे (पोतानुं) मन परोवायुं होय नही! तेम ते मुनिराजे (पोताना) पगोमां भांगेला तीक्ष्ण कांटाओ पण कहाड्या नही. ॥ ९६ ॥

उदासीन इवास्थानकृतरागापराधयोः । चकर्ष चक्षुषोरेष न तृणं न रजःकणम् ॥ ९७ ॥

अन्वयः-अस्थान कृत राग अपराधयोः चक्षुषोः उदासीनः इव एषः तृणं रजः कणं न चकर्ष. ॥ ९७ ॥

अर्थः-अयोग्य स्थाने करेला रागरूपी अपराधवाळा बन्ने चक्षुओप्रते जाणे बेदरकार थया होय नहीं! एवा ते मुनिराजे तेमांथी तणखलुं के रजनो कण (पण) कहाड्यां नही. ॥ ९७ ॥

आसन्नविलसन्मुक्तिवधूलीनमना इव । चरन्मार्गं न तत्याज तीव्रकर्करमप्यसौ ॥ ९८ ॥

अन्वयः—आसन्न विलसत् मुक्ति वधू लीन मनाः इव, असौ मार्गं चरन् तीव्र कर्करं अपि न तत्याज. ॥ ९८ ॥

अर्थः-नजीक आवती एवी मुक्तिरूपी स्त्रीमां जाणे आसक्त मनवाळा थया होय नही! तेम ते मुनिराजे मार्गे चालतां तीक्ष्ण कांकराने पण तज्यो नही. ॥ ९८ ॥

स्वदेहेऽपि निरीहोऽयमिति शुद्धमतिर्यतिः। पुरः स्फुरति सिंहेऽपि सहजां नात्यजद्गतिम् ॥ ९९ ॥

अन्वयः-इति स्व देहे अपि निरीहः अयं शुद्धमतिः यतिः पुरः सिंहे स्फुरति अपि सहजां गतिं न अत्यजत्. ॥ ९९ ॥

अर्थः—एरीते पोताना शरीरनी पण ममताविनाना आ निर्मल बुद्धिवाळा मुनिए आगळ सिंह आवीने उभो रहेतां पण (पोतानी) स्वाभाविक गतिनो त्याग कर्यो नही. ॥ ९९ ॥

कदाचित्क्वचिदौचित्यचतुरैढौकितं नरैः। स धीरस्तुषसौवीरतक्राद्यं त्याज्यमग्रहीत् ॥ १०० ॥

अन्वयः—सः धीरः कदाचित् क्वचित् औचित्य चतुरैः नरैः ढौकितं, त्याज्यं तुष सौवीर तक्राद्य अग्रहीत्. ॥ १०० ॥

अर्थः—ते धैर्यवान संवरमुनि कोइक समये, क्यांक योग्यतामां निपुण, एवा पुरुषोए आपेलां, अने फेंकी देवालायक, एवां (धान्यनां) फोतरांनी कांजी अथवा छाशआदिक (आहारमाटे) ग्रहण करता. ॥ १०० ॥

एवमप्रतिबद्धेन स्वविहारक्रमेण सः। प्रतिकर्मविमुक्ताङ्गो निन्ये धात्रीं पवित्रताम् ॥ १ ॥

अन्वयः—एवं अप्रतिबद्धेन स्वविहार क्रमेण प्रतिकर्म विमुक्त अंगः सः धात्रीं पवित्रतां निन्ये. ॥ १ ॥

अर्थः—एरीते पोताना अस्खलित विहारना क्रमथी, शरीरमाटे कोइ पण जातनी दरकार राख्याविना, ते मुनिराज पृथ्वीने पा-

वन करवा लाग्या. ॥ १ ॥

एवं विहरतस्तस्य गते काले कियत्यपि । अभूल्लाभान्तरायस्योदयः कश्चन कर्मणः ॥ २ ॥

अन्वयः-एवं विहरतः तस्य कियति अपि काले गते लाभ अंतरायस्य कर्मणः कश्चन उदयः अभूत्. ॥ २ ॥

अर्थः-एरीते विहार करतांथकां ते मुनिराजने केटलोक समय वीत्याबाद लाभांतराय कर्मनो कोइक उदय प्रगट थयो. ॥ २ ॥

क्वचिन्न लभते भिक्षामकल्प्यां क्वापि नेच्छति । कल्प्यमानामपि क्वापि नादत्तेऽन्यैरपेक्षिताम् ॥ ३ ॥

अन्वयः-क्वचित् भिक्षां न लभते, क्व अपि अकल्प्यां न इच्छति, क्व अपि कल्प्यमानां अपि अन्यैः अपेक्षितां न आदत्ते.

अर्थः—तेमने क्यांक भिक्षा मलतीज नथी, वळी क्यांक न कल्पे एवी होवाथी ते माटे ते इच्छा करता नथी, वळी क्यांक कल्पे एवी होवा छतां पण, ने बीजा भिक्षुओमाटेनी होवाथी, तेवी भिक्षा पण ते लेता नथी. ॥ ३ ॥

इत्थं यथा यथा क्लिष्टो हृष्टः सोऽभूत्तथा तथा । क्षयो हि कर्मणां मङ्क्षु मुनीनामुत्सवो महान् ॥ ४ ॥

अन्वयः-इत्थं सः यथा यथा क्लिष्टः तथा तथा हृष्टः अभूत्, हि कर्मणां क्षयः मंक्षु मुनीनां महान् उत्सवः. ॥ ४ ॥

अर्थः—एरीते ते मुनिराजने जेम जेम परीषह थतो गयो, तेम तेम ते खुशी थवा लाग्या, केमके कर्मोनो क्षय, ए खरेखर मुनिओने महान् उत्सवरूप थइ पडे छे. ॥ ४ ॥

अस्योद्यतविहारस्य निराहारस्य सर्वथा । सत्तामात्रशरीरस्य षण्मासा व्यतिचक्रमुः ॥ ५ ॥

अन्वयः—उद्यत विहारस्य, सर्वथा निराहारस्य, सत्ता मात्र शरीरस्य अस्य षण्मासाः व्यतिचक्रमुः. ॥ ५ ॥

अर्थः—उग्र विहारवाळा, तथा बिल्कुल आहारविनाना, अने फक्त हयातिरूपज शरीरवाळा, एवा ते मुनिराजना (एरीते) छ मासो व्यतित थया. ॥ ५ ॥

**कदापि क्वापि कान्तारे दिनान्ते शान्तचेतनः । तस्थौ धर्मद्विपालानस्तम्भायिततनुर्मुनिः ॥ ६ ॥**

अन्वयः—कदापि क्व अपि कांतारे दिनांते शांत चेतनः, धर्म द्विप आलान स्तंभायित तनुः मुनिः तस्थौ. ॥ ६ ॥

अर्थः—एक दिवसे क्यांक वनमां सूर्यास्त समये शांत मनवाळा, तथा धर्मरूपी हाथीने बांधवाना स्तंभसरखा (निश्चल) शरीरवाळा ते मुनि उभा रह्या. ॥ ६ ॥

**संसारतापनिर्वापसज्जपीयूषमज्जनम् । अथ प्रापदयं कायोत्सर्गध्यानलयं मुनिः ॥ ७ ॥**

अन्वयः—अथ अयं मुनिः संसार ताप निर्वाप सज्ज पीयूष मज्जनं कायोत्सर्ग ध्यान लयं प्रापत्. ॥ ७ ॥

अर्थः—पछी ते संवरमुनि संसारना तापने मटाडवामाटे तैयार थयेल छे अमृतनुं स्नान जेमां, एवा कायोत्सर्गना ध्यानननी लीनताने प्राप्त थया. ॥ ७ ॥

**ततो नखंपचीभूतभूतलक्षोदमण्डलः । तं कोऽप्यतापयत्तापो निशीथसमये महान् ॥ ८ ॥**

अन्वयः-ततः निशीथ समये नखंपचीभूत भूतल क्षोद मंडलः कः अपि महान् तापः तं अतापयत्. ॥ ८ ॥

अर्थः—पछी मध्यरात्रिसमये नखोने पण बाळी नाखे एवो थयेल छे पृथ्वीपरनो धूलिनो समूह जेनाथी, एवो कोइक विचित्र प्रकारनो अत्यंत ताप ते मुनिराजने तपाववा लाग्यो. ॥ ८ ॥

**किमेतदित्ययं यावद्विभावयति फुल्लदृक् । ललाटंतपतेजस्कं तपनं तावदैक्षत ॥ ९ ॥**

अन्वयः—एतत् किं ? इति यावत् अयं फुल्लदृक् विभावयति, तावत् ललाटंतप तेजस्कं तपनं ऐक्षत. ॥ ९ ॥

अर्थः—आ ते शुं ? एम विचारी जेवामां ते आंखो उघाडीने जुए छे, तेवामां ललाटने तपावी मूके एवा ( तीव्र ) तेजवाळा सूर्यने ( तेमणे ) जोयो. ॥ ९ ॥

**पुरस्तुङ्गतरुस्तोमच्छायालीनामलोकत । भुञ्जानजनसंतानामसौ शकटमण्डलीम् ॥ १० ॥**

अन्वयः—पुरः तुंग तरु स्तोम च्छाया लीनां, भुंजान जन संतानां शकट मंडलीं असौ अलोकत. ॥ १० ॥

अर्थः—वळी आगळना भागमां उंचां वृक्षोना समूहोनी छायामां छुपायेली, तथा भोजन करती छे लोकोनी पंक्ति ज्यां, एवी गाडीओनी श्रेणिने ते मुनिराजे दीठी. ॥ १० ॥

**विहातुमुध्धृतं दग्धमन्नं तन्मध्यगो नरः । तदैवात्युत्सुको निर्यन्नरेणान्येन भाषितः ॥ ११ ॥**

अन्वयः—तन्मध्यगः नरः तदा एव उध्धृतं दग्धं अन्नं विहातुं अति उत्सुकः निर्यन् अन्येन नरेण भाषितः. ॥ ११ ॥

अर्थः—लोकोना ते समूहमानो (कोइ एक ) पुरुष तेज वखते, वधेलुं, अने बळी गयेलुं अन्न फेंकी देवाने अति उतावळथी

बहार निकळ्यो, (त्यारे) बीजा (कोइ एक) पुरुषे (तेने) कह्युं के, ॥ ११ ॥

अस्मिन्महामुनौ मुक्तविकल्पे जिनकल्पिनि । कल्प्यमन्नमिदं देहि भिक्षाकालो हि संप्रति ॥ १२ ॥

अन्वयः—मुक्त विकल्पे जिनकल्पिनि अस्मिन् महामुनौ इदं कल्प्यं अन्नं देहि? हि संप्रति भिक्षाकालः. ॥ १२ ॥

अर्थः—(कोइ पण जातना ) विकल्पविनाना, तथा जिनकल्पीनी क्रिया करनारा एवा आ महामुनिराजने कल्पे एवुं आ अन्न आप? केमके आ वखते भिक्षा आपवानो समय छे. ॥ १२ ॥

दग्धेनान्नेन दत्तेन क्रीणासि सुकृतं न किम् । कृष्णाङ्गारेण किं लभ्यमानो नादीयते मणिः ॥ १३ ॥

अन्वयः-दग्धेन अन्नेन दत्तेन सुकृतं किं न क्रीणासि? कृष्ण अंगारेण लभ्यमानः मणिः किं न आदीयते? ॥ १३ ॥

अर्थः—( आ ) बळेलुं अन्न आपीने ( तेना बदलामां तुं ) पुण्यने शामाटे खरीदतो नथी? ( केमके ) कोलसाने बदले मळतुं मणि शामाटे न लेइयें? ॥ १३ ॥

इत्यस्य वाक्यमाकर्ण्य प्रहृष्यन्पुलकाञ्चितः । इदं प्रभो गृहाणेति सोऽन्नहस्तोऽभ्यधान्मुनिम् ॥ १४ ॥

अन्वयः-इति अस्य वाक्यं आकर्ण्य प्रहृष्यन् पुलक अंचितः सः ( हे ) प्रभो! इदं गृहाण? इति अन्नहस्तः मुनिं अभ्यधात्.

अर्थः-एवीरीतनुं तेनुं वचन सांभळीने खुशी थतो, तथा रोमांचित थयेलो ते पुरुष, हे भगवन्! आ ग्रहण करो? एम हाथमां अन्न लेइने ते संवर मुनिने कहेवा लाग्यो. ॥ १४ ॥

अथ साधुः सुधीर्दध्यौ किमियं मे प्रमत्तता । न ज्ञाता यामिनो यान्ती न व्योमान्तर्व्रजन्रविः ॥१५॥

अन्वयः-अथ सुधीः साधुः दध्यौ, इयं किं मे प्रमत्तता ? यांती यामीनी न ज्ञाता, व्योमांतः व्रजन् रविः न ! ॥ १५ ॥

अर्थः-त्यारे उत्तम बुद्धिवान् ते संवरमुनि विचारवा लाग्या के, आ ते शुं मने प्रमाद थयो ! के, चाली जती रात्रिने हुं जाणी शक्यो नही ! तेमज आकाशमां विचरता सूर्यने पण हुं जाणी शक्यो नहि! ॥ १५ ॥

स्वप्नोऽयमिन्द्रजालं वा किं वा कोऽपि मतिभ्रमः । चक्रे देवेन केनापि माया मायाविनाथवा ॥ १६ ॥

अन्वयः-किं अयं स्वप्नः वा इन्द्रजालं ? वा कः अपि मतिभ्रमः ! अथवा केन अपि मायाविना देवेन माया चक्रे ! ॥ १६ ॥

अर्थः-( माटे ) शुं आ स्वप्न छे ? अथवा इन्द्रजाल छे ? अथवा कोइ जातनो बुद्धिभ्रम छे ! अथवा कोइक कपटी देवे ( शुं ) आ माया विकुर्वि छे ! ॥ १६ ॥

किमनल्पैर्विकल्पैर्वा ममैभिर्निर्ममात्मनः । संदेहे सति देहार्थं न गृह्णेऽन्नमिदं ध्रुवम् ॥ १७ ॥

अन्वयः—वा निर्मम आत्मनः मम एभिः अनल्पैः विकल्पैः किं ? संदेहे सति देहार्थं ध्रुवं इदं अन्नं न गृह्णे. ॥ १७ ॥

अर्थः-अथवा ममतारहित आत्मावाळा एवा मने आवा अनेक विकल्पो (करवानी) शुं जरुरछे ? संशय पडवाथी शरीरमाटे खरे-आखर आहार हुं ग्रहण करीश नही. ॥ १८ ॥

इति निश्चित्य शुद्धात्मा स पटुः प्राह तौ प्रति । शमामृतसमुद्रोर्मिच्छटाभिर्वर्णराजिभिः ॥ १८ ॥

अन्वयः-इति निश्चित्य शुद्ध आत्मा सः पटुः तौ प्रति शम अमृत समुद्र ऊर्मि च्छटाभिः वर्ण राजिभिः प्राह. ॥ १८ ॥

अर्थः—एम निश्चय करीने निर्मल आत्मावाळा ते चतुर मुनिराज ते बन्ने पुरुषोप्रते शांतिरूपी अमृतसागरना मोजांओसरखी अक्षरोनी पंक्तिवडे कहेवा लाग्या के, ॥ १८ ॥

**मया ध्यानं निशारम्भे समारेभेऽधुनैव च । अधुनैव च तिग्मांशुश्चरत्यम्बरशेखरः ॥ १९ ॥**

अन्वयः-मया च अधुना एव निशा आरंभे ध्यानं समारेभे, च अधुना एव अंबर शेखरः तिग्मांशुः चरति. ॥ १९ ॥

अर्थः—में तो हमणाज रात्रिना प्रारंभसमये ध्याननो प्रारंभ कर्यो छे, अने ( एटलामां ) हमणाज आकाशना मुकुट जेवो (आ) सूर्य (केम) विचरी रह्यो हशे ! ॥ १९ ॥

**तत्सत्योऽयमसत्यो वाभ्युदयः कर्मसाक्षिणः । इति संदेहदोलार्तमना नैवान्नमाददे ॥ २० ॥ युग्मम् ॥**

अन्वयः-तत् कर्मसाक्षिणः अयं अभ्युदयः सत्यः वा असत्यः ? इति संदेह दोला आर्त मनाः अन्नं नैव आददे. ॥२०॥ युग्मं ॥

अर्थः-माटे सूर्यनो आ उदय साचो छे ? के खोटो छे ? एरीते संशयथी हींचोळातां मनवाळो (हुं आ) अन्न बिलकुल लेइश नही.

**गिरेरधिकमाहारं पयोधेरधिकं पयः । जीवोऽग्रहीदहोरात्रमज्ञातेषु भवेष्वपि ॥ २१ ॥**

अन्वयः—जीवः अज्ञातेषु भवेषु अहोरात्रं गिरेः अधिकं आहारं, पयोधेः अधिकं पयः अपि अग्रहीत्. ॥ २१ ॥

अर्थः—( आ ) जीवे अज्ञानी भवोमां रातदहाडो पर्वतथी अधिक आहार, तथा महासागरथी अधिक जल पण ग्रहण करेलां छे.

तत्तैर्यदि न तृप्तोऽस्मि तदन्नेनामुनाद्य किम् । यास्यामि तृप्तिमात्तेन दिवसस्यापि संशये ॥ २२ ॥

अन्वयः—तत् तैः यदि न तृप्तः अस्मि, तत् अद्य दिवसस्य अपि संशये अमुना अन्नेन आत्तेन किं तृप्तिं यास्यामि ? ॥ २२ ॥

अर्थः—माटे तेथी ज्यारे हुं तृप्त थयो नथी, तो आजे दिवसनो पण संदेह होवाथी आ आहार लेइने हुं केम तृप्ति पामी शकीश ?

इत्युदीर्य तपोवीर्यवर्यो धैर्यधुरन्धरः । स यावल्लीयते ध्याने शुद्धश्रद्धानमानसः ॥ २३ ॥

न तावदनसां राजी न च राजीवबान्धवः । किंतु व्यलोकि मुनिना यथावस्था निशीथिनी ॥२४॥युग्मं.

अन्वयः—इति उदीर्य तपः वीर्य वर्यः, धैर्य धुरंधरः, शुद्ध श्रद्धान मानसः सः यावत् ध्याने लीयते, ॥ २३ ॥ तावत् अनसां राजी न, च राजीव बांधवः न, किंतु मुनिना यथावस्था निशीथिनी व्यलोकि. ॥ २४ ॥ युग्मं ॥

अर्थः—एम कहीने तपना वीर्यथी उत्तम, तथा धैर्यवडे अग्रेसर, अने निर्मल श्रद्धायुक्त हृदयवाळा ते संवरमुनि जेवामां ध्यानमां लीन थाय छे, ॥ १३ ॥ तेवामां (त्यां) ते गाडीओनी श्रेणि नहोती, अने सूर्य पण अदृश्य थइ गयो, परंतु ते मुनिए यथास्थितपणे मध्यरात्रि जोइ. ॥ २४ ॥

तदैव दैवते मार्गे दूरं दुन्दुभयोऽनदन् । शुद्धगन्धोदकैर्मिश्राः प्रसस्रुः पुष्पवृष्टयः ॥ २५ ॥

अन्वयः—तदा एव दैवते मार्गे दूरं दुंदुभयः अनदन्, शुद्ध गंध उदकैः मिश्राः पुष्पवृष्टयः प्रसस्रुः. ॥ २५ ॥

अर्थः—(वळी) तेज वखते आकाशमां दूरथी दिव्य वाजित्रो वागवां लाग्यां, तथा निर्मल सुगंधि जलथी मिश्र थयेली पुष्पोनी

वृष्टिओ पडवा लागी. ॥ २५ ॥

**लीलाचलज्झलत्कारतारमाणिक्यकुण्डलः । आस्येन्दुस्यन्दिपीयूषबिन्दुसुन्दरहारभृत् ॥ २६ ॥**

**मौलिन्यस्तकरद्वन्द्वद्विगुणीकृतशेखरः । एनमेनश्छिदं कश्चिदमरो मुनिमानमत् ॥ २७ ॥युग्मम्॥**

अन्वयः—लीला चलत् झलत्कार तार माणिक्य कुंडलः, आस्य इंदु स्यंदि पीयूष बिंदु सुंदर हारभृत्, ॥ २६ ॥ मौलि न्यस्त कर द्वंद्व द्विगुणीकृत शेखरः कश्चित् अमरः एनं एनः छिदं मुनिं आनमत्. ॥ २७ ॥ युग्मं ॥

अर्थः—स्वभावथी चपल अने चळकाटवाळा मनोहर माणिक्यना कुंडलोवाळो, तथा मुखरूपी चंद्रमांथी झरता अमृतना बिंदुओथी मनोहर थयेला हारने धारण करनारो, ॥२६॥ अने मस्तकपर धारण करेला बन्ने हाथोवडे बेवडा करेला मुकुटवाळो, एवो कोइक देव आ पापोने विनाश करनारा मुनिराजने ( आवी ) नम्यो. ॥ २७ ॥ युग्मं ॥

**प्रभो जय जय प्रौढज्ञानशुद्धतपोनिधे । यस्त्वं मयापि दुष्टेन सत्त्वं न त्याजितः क्वचित् ॥ २८ ॥**

अन्वयः—दुष्टेन अपि मया यः क्वचित् सत्त्वं न त्याजितः, (हे) प्रभो! (हे) प्रौढ ज्ञान शुद्ध तपः निधे! त्वं जय जय!

अर्थः-( तथा कहेवा लाग्यो के ) दुष्ट एवो पण हुं जेमनुं क्यांयें पण सत्त्व तजावी शक्यो नही, एवा हे भगवन्! तथा हे विशाल ज्ञानयुक्त निर्मल तपना भंडारसरखा! एवा तमो जय पामो! जय पामो! ॥ २८ ॥

सुधर्मायां सुधर्मात्मा निविष्टो हृष्टमानसः । कदाप्यकस्मात्पुलकी न्यधान्मूर्ध्नि हरिः करौ ॥ २९ ॥

अन्वयः-कदापि सुधर्मायां निविष्टः, सुधर्मात्मा, हृष्ट मानसः हरिः अकस्मात् पुलकी करौ मूर्ध्नि न्यधात्. ॥ २९ ॥

अर्थः—एक दिवसे सुधर्मासभामां बेठेला, उत्तम धर्ममय आत्मावाळा, तथा आनंदित हृदयवाळा, एवा इंद्रे अचानक रोमांचित थइने ( पोताना ) बन्ने हाथ मस्तकपर धारण कर्या. ॥ २९ ॥

तव कौतस्कुतः स्वामिन्नद्य हर्षोऽयमीदृशः । इति पृष्टोऽम्बराख्येन सुरेण द्युपतिर्जगौ ॥ ३० ॥

अन्वयः—(हे) स्वामिन्! अद्य तव अयं ईदृशः हर्षः कौतस्कुतः? इति अंबर आख्येन सुरेण पृष्टः द्युपतिः जगौ. ॥ ३० ॥

अर्थः-हे स्वामी! आजे आपने आ आवडोबधो हर्ष शानो थयो छे? एम अंबरनामना देवे पूछवाथी इन्द्रे कह्युं के, ॥ ३० ॥

किं कोऽप्यस्ति तपःपात्रं धरित्रीपीठपावनः । इत्यद्य भरतक्षेत्रे हृन्नेत्रेण गतं मया ॥ ३१ ॥

अन्वयः—किं धरित्री पीठ पावनः कः अपि तपःपात्रं अस्ति? इति अद्य हृद् नेत्रेण मया भरतक्षेत्रे गतं ॥ ३१ ॥

अर्थः—शुं पृथ्वीतलने पवित्र करनारा एवा कोइ पण महातपस्वी मुनि विद्यमान छे'? एम विचारी हुं हृदयरूपी नेत्रवडे भरतक्षेत्रमां गयो, (अर्थात् ज्ञानचक्षुवडे में भरतक्षेत्रमां निरीक्षण कर्युं.) ॥ ३१ ॥

मुनीन्दुः संवरो नाम तत्र भूखण्डभूषणम् । अदर्शि तपसां राशिस्तिग्मांशुरिव तेजसाम् ॥ ३२ ॥

अन्वयः—तत्र तेजसां राशिः, भूखंड भूषणं तिग्मांशुः इव तपसां राशिः संवरो नाम मुनींदुः अदर्शि. ॥ ३२ ॥

अर्थः—त्यां तेजना समूहरूप, अने भूमंडलना अलंकाररूप सूर्य सरखा, तपना समूहवाळा संवरनामना मुनिचंद्रने में जोया.

तस्य विश्वैकवन्द्यस्य दार्ढ्यं तपसि दुष्करे । पश्यतो मे मुदावेशः सर्वक्लेशहरोऽभवत् ॥ ३३ ॥

अन्वयः—विश्व एक वंद्यस्य तस्य दुष्करे तपसि दार्ढ्यं पश्यतः मे सर्व क्लेश हरः मुद् आवेशः अभवत्. ॥ ३३ ॥

अर्थः—जगतने एक पूजवा लायक एवा ते मुनिराजनुं दुष्कर तपमां पण निश्चलपणुं जोता एवा मने सर्व क्लेशोने हरनारो हर्षनो उभरो आव्यो. ॥ ३३ ॥

केनापि चाल्यते नायं सत्त्वात्तत्त्वविदां वरः । इत्युत्कर्षेण हर्षस्य मयास्य प्रणतिः कृता ॥ ३४ ॥

अन्वयः—तत्त्वविदां वरः अयं केन अपि न चाल्यते, इति हर्षस्य उत्कर्षेण मया अस्य प्रणतिः कृता. ॥ ३४ ॥

अर्थः—तत्वज्ञानीओमां श्रेष्ठ एवा आ मुनि कोइथी पण चलायमान थइ शके तेम नथी, एम विचारतां हर्षना उभराथी में तेमने नमस्कार कर्यो. ॥ ३४ ॥

सोऽथ क्रुधाभ्यधादिन्द्रमिन्द्रसामानिकः सुरः । मर्त्यो न चाल्यते सत्त्वादेषा भाषा मृषा तव ॥ ३५ ॥

अन्वयः—अथ इंद्रसामानिकः सः सुरः क्रुधा अभ्यधात्, मर्त्यः सत्त्वात् न चाल्यते, एषा तव भाषा मृषा. ॥ ३५ ॥

अर्थः—पछी इंद्रसामानिक एवो ते अंबरदेव क्रोधथी बोल्यो के, मनुष्यने (तेना) सत्त्वथी चलायमान न करी शकाय, ए

तमारुं वचन जूठुं छे. ॥ ३५ ॥

स्वेच्छया स्वाम्यतः स्वामी वदन्केनेह वार्यते । तं षण्मासान्तरे सत्त्वभ्रष्टं स्पष्टं करोम्यहम् ॥ ३६ ॥

अन्वयः—स्वाम्यतः स्वेच्छया वदन् स्वामी इह केन वार्यते ? अहं तं षण्मासांतरे स्पष्टं सत्त्वभ्रष्टं करोमि. ॥ ३६ ॥

अर्थः-(पोताना) उपरीपणाथी पोतानी मरजीमुजब बोलता एवा मालीकने अहीं कोण अटकावी शके ? (परंतु) हुं ते मुनिने छ मासनी अंदर प्रगटपणे प्रतिज्ञाभंग करनारो छुं. ॥ ३६ ॥

असाविति प्रतिज्ञाय सत्त्वभङ्गाय तेऽचलत् । मुहुर्मुहुर्महेन्द्रेण वार्यमाणोऽपि मूढधीः ॥ ३७ ॥

अन्वयः-इति प्रतिज्ञाय मूढधीः असौ महेंद्रेण मुहुः मुहुः वार्यमाणः अपि ते सत्त्व भंगाय अचलत्. ॥ ३७ ॥

अर्थः—एरीतनी प्रतिज्ञा करीने मूर्खबुद्धिवाळो ते अंबरदेव इन्द्रे वारंवार निवार्यो छतां पण तमारो नियमभंग करवामाटे चाल्यो,

स्वपुण्यनिवहस्येव स भिक्षाग्रहणेषु ते । प्रत्यूहव्यूहमत्युग्रं धिक् षण्मासावधिं व्यधात् ॥ ३८ ॥

अन्वयः—धिक्, सः स्व पुण्य निहवस्य इव ते भिक्षा ग्रहणेषु षण्मासावधिं अत्युग्रं प्रत्यूहव्यूहं व्यधात्. ॥ ३८ ॥

अर्थः-धिक्कार छे! के तेणे पोताना पुण्योना समूहनीपेठे, तमोने भिक्षा लेवामां छ माससुधी अति प्रचंड विघ्नोनो समूह कर्यो.

निशि पापेन तेनेह तेने मायामयो रविः । सभोज्यजनसंघट्टा शकटानां घटा पुनः ॥ ३९ ॥

अन्वयः—तेन पापेन इह निशि मायामयः रविः, पुनः सभोज्य जन संघट्टा शकटानां घटा तेने. ॥ ३९ ॥

अर्थः—(वळी) ते पापी देवे अहीं रात्रिए कपटमय सूर्य, तथा भोजन करता मनुष्योना समूहवाळी गाडीओनी श्रेणि विस्तारी हती. ॥ ३९ ॥

**महाकपटनाटयेन नानेनाप्यसि चालितः । यद्वा संसारनाटयेनाचालितः केन चाल्यते ॥ ४० ॥**

अन्वयः—अनेन महाकपट नाटयेन अपि चालितः न असि, यद्वा संसार नाटयेन अचालितः केन चाल्यते. ॥ ४० ॥

अर्थः—( ए रीतना ) ते कपट नाटकथी पण तमो चलायमान थया नही, अथवा संसारना नाटकथी ( पण ) अचल रहेलाने कोण चलावी शके? ॥ ४० ॥

**तन्मुने पापिना येन विरुद्धमिति ते कृतम् । स एवास्मि प्रभो विश्वमपराधं क्षमस्व मे ॥ ४१ ॥**

अन्वयः—(हे) मुने! येन पापिना ते इति विरुद्धं कृतं, सः एव असि, तत् (हे) प्रभो! मे विश्वं अपराधं क्षमस्व? ॥४१॥

अर्थः—हे मुनिराज! जे पापीए आपप्रते आरीते विरुद्ध आचरण कर्युं छे, तेज आ हुं छुं. माटे हे भगवन्! मारा सघळा अपराधनी आप क्षमा करो? ॥ ४१ ॥

**इत्युक्त्वा दुःखहर्षाश्रुमिश्रदृष्टिरयं सुरः । बहुस्तुतिमहानादः पादयोरपतन्मुनेः ॥ ४२ ॥**

अन्वयः—इति उक्त्वा दुःख हर्ष अश्रु मिश्र दृष्टिः, बहु स्तुति महानादः अयं सुरः मुनेः पादयोः अपतत्. ॥ ४२ ॥

अर्थः—एम कहीने दुःख तथा हर्षना आंसुओथी भरेली आंखोवाळो, तथा घणी स्तुतिओना महान स्वरवाळो ते देव ते मुनिना

चरणोमां पड्यो. ॥ ४२ ॥

अथात्तधर्मलाभोक्तिर्यतिर्नतिपरं सुरम् । तमुवाच विचाराब्धिचञ्चच्चन्द्रिकया गिरा ॥ ४३ ॥

अन्वयः-अथ आत्त धर्म लाभ उक्तिः यतिः विचार अब्धि चंचत् चंद्रिकया गिरा नतिपरं तं सुरं उवाच. ॥ ४३ ॥

अर्थः-पछी कहेल छे धर्मलाभनुं वचन जेणे एवा ते संवरमुनिराज विचाररूप समुद्रप्रते चळकती चांदनीसरखी वाणीवडे नमता एवा ते देवने कहेवा लाग्या के, ॥ ४३ ॥

नापराद्धं त्वया किं तु कृतिन्नुपकृतिः कृता । तव साहाय्यमाहात्म्याद्दुःकर्म क्षितं मया ॥ ४४ ॥

अन्वयः—(हे) कृतिन् ! त्वया न अपराद्धं, किंतु उपकृतिः कृता, तव साहाय्य माहात्म्यात् मया दुःकर्म क्षितं. ॥ ४४ ॥

अर्थः-हे चतुर देव ! तें अपराध कर्यो नथी, परंतु उपकारज कर्यो छे, तारी मददना प्रभावथी में (मारां) दुष्कर्मोनो नाश कर्यो छे.

अपराधस्त्वया हन्त क्षन्तव्यः किं तु मामकः । यत्त्वैवं बभूवाहं दुःकर्मार्जनकारणम् ॥ ४५ ॥

अन्वयः—किंतु हंत ! त्वया मामकः अपराधः क्षंतव्यः, यत् अहं एवं तव दुःकर्म अर्जन कारणं बभूव. ॥ ४५ ॥

अर्थः-परंतु अरेरे ! तारे मारा अपराधनी क्षमा करवी, केमके हुं आवी रीते तने दुष्कर्मो उपार्जन करवाना कारणरूप थइ पड्यो

एवं निश्छद्मनोर्धर्मसंलापं तन्वतोस्तयोः उदयाचलचूलायां चण्डरोचिररोचत ॥ ४६ ॥

अन्वयः-एवं निश्छद्मनोः तयोः धर्म संलापं तन्वतोः उदय अचल चूलायां चंडरोचिः अरोचत. ॥ ४६ ॥

अर्थः-एरीते कपटरहित तेओ बन्ने धर्मसंबंधि वातो करता हता, एवामां उदयाचलना शिखरपर सूर्य चळकवा लाग्यो. ॥४६॥

**एनं मुनिं विनम्याथ विबुधोऽयं तिरोदधे । ईर्यासमितिसंचारचारुर्मुनिरथाचलत् ॥ ४७ ॥**

अन्वयः—अथ एनं मुनिं विनम्य अयं विबुधः तिरोदधे, अथ ईर्यासमिति संचार चारुः मुनिः अचलत्. ॥ ४७ ॥

अर्थः—पछी ते मुनिराजने नमीने ते देव अदृश्य थयो, तथा ईर्यासमितिपूर्वक विहार करवामां कुशल एवा ते मुनिराज पण विहार करवा लाग्या. ॥ ४७ ॥

**स्वापराधानुतापेन तं मुनीन्द्रमनिद्रधीः । असेवत धृतान्तर्धिः स्वर्धामा शुद्धभावनः ॥ ४८ ॥**

अन्वयः-अनिद्रधीः, शुद्ध भावनः स्वर्धामा स्व अपराध अनुतापेन धृत अंतर्धिः तं मुनींद्रं असेवत. ॥ ४८ ॥

अर्थः—महान बुद्धिवाळो, तथा निर्मल भावनावाळो ते देव पोताना अपराधना पश्चात्तापपूर्वक अदृश्य रहीने ते मुनिराजनी सेवा करवा लाग्यो. ॥ ४८ ॥

**स मुनिर्भुवि शुद्धायां यत्र यत्र ददौ पदम् । तां तां स चक्रे प्रागेव देवोऽकण्टककर्कराम् ॥ ४९ ॥**

अन्वयः-सः मुनिः यत्र यत्र शुद्धायां भुवि पदं ददौ, तां तां प्राग् एव सः देवः अकंटक कर्करां चक्रे.

अर्थः—ते मुनिराज जे जे शुद्ध भूमिपर पग देता हता, ते ते भूमिने प्रथमथीज ते देव कांटाओ तथा कांकराओथी रहित करवा लाग्यो. ॥ ४९ ॥

अमायिनः समायान्तं मुनिमुख्यस्य संमुखम् । हिंस्रं प्राणभृतां वारं स दूरेण न्यवारयत् ॥ ५० ॥

अन्वयः—अमायिनः मुनिमुख्यस्य संमुखं समायांतं हिंस्रं प्राणभृतां वारं सः दूरेण न्यवारयत्. ॥ ५० ॥

अर्थः—(ते) निष्कपटी मुनिराजनी सन्मुख आवता हिंसक प्राणीओना समूहने ते देव दूरथीज अटकावी राखवा लाग्यो.

घर्मे समीरणीभूय छत्रीभूयोष्णदीधितौ । शिशिरीभूय तत्तोर्व्यां सांनिध्यं स व्यधान्मुनेः ॥ ५१ ॥

अन्वयः-सः घर्मे समीरीभूय, उष्ण दीधितौ छत्रीभूय, तप्त ऊर्व्यां शिशिरीभूय, मुनेः सांनिध्यं व्यधात्. ॥ ५१ ॥

अर्थः—(वळी) ते देव गरमीवखते पवनरूपे थइने, सूर्यना तापवखते छत्ररूप थइने, तथा तपेली जमीनपर शीतल थइने ते मुनिराजनी सेवा करवा लाग्यो. ॥ ५१ ॥

एवं स विहरन्नाप ग्रामं रामपुराभिधम् । यावत्तावदलंचक्रे नभोगर्भं नभोमणिः ॥ ५२ ॥

अन्वयः-एवं विहरन् यावत् सः रामपुर अभिधं ग्रामं आप, तावत् नभोगर्भं नभोमणिः अलंचक्रे. ॥ ५२ ॥

अर्थः—एरीते विहार करता जेवामां ते मुनिराज रामपुरनामना गाममां आव्या, तेवामां आकाशमंडलने सूर्य शोभाववा लाग्यो.

कुटुम्बिनो धनाख्यस्य धन्या नाम कुटुम्बिनी । त्याज्येनान्नेन दग्धेन तं मुनि प्रत्यलाभयत् ॥ ५३ ॥

अन्वयः—धनाख्यस्य कुटुंबिनः धन्या नाम कुटुंबिनी त्याज्येन दग्धेन अन्नेन तं मुनिं प्रत्यलाभयत्. ॥ ५३ ॥

अर्थः-(त्यां) धननामना कुटुंबिनी धन्या नामनी कुटुंबिनीए फेंकी देवाना बळेला आहारवडे ते मुनिराजने प्रतिलाभ्या. ॥५३॥

अहो दानमहो दानमिति जल्पन्नसौ तदा । चकार सुमनोवृष्टीरम्बरादम्बरः सुरः ॥ ५४ ॥

अन्वयः—तदा अहो ! दानं ! अहो ! दानं ! इति जल्पन् असौ अंबरः सुरः अंबरात् सुमनः वृष्टीः चकार. ॥ ५४ ॥

अर्थः—ते वखते अहो ! दान ! अहो ! दान ! एम बोलता ते अंबरदेवे आकाशमांथी पुष्पवृष्टि करी. ॥ ५४ ॥

एवं पदे पदे तन्यमानधर्मप्रभावनः । तपोऽस्त्रधारया कर्म प्रहरन्व्यहरन्मुनिः ॥ ५५ ॥

अन्वयः—एवं पदे पदे तन्यमान धर्म प्रभावनः मुनिः तपः अस्त्र धारया कर्म प्रहरन् व्यहरत्. ॥ ५५ ॥

अर्थः—एवीरीते पगले पगले धर्मनी प्रभावना करता एवा ते मुनिराज तपरूपी शस्त्रनी धाराथी कर्मोने विदारताथका विचरवा लाग्या. ॥ ५५ ॥

अथायमायुषः शेषे विहितानशनः कृती । सशुचा तेन देवेन सेव्यमानपदाम्बुजः ॥ ५६ ॥

स्मृत्वा पञ्चनमस्कारान्पादपोपगमस्थितिः । शुद्धध्यानरसोल्लासलयसंलीनमानसः ॥ ५७ ॥

आसन्नमुक्तिसौख्यौघनिष्यन्दैरिव पूरितम् । सर्वार्थसिद्धनामानं विमानं मुनिरासदत् ॥ ५८ ॥

अन्वयः—अथ आयुषः शेषे विहित अनशनः, कृती, सशुचा तेन देवेन सेव्यमान पद अंबुजः, ॥ ५६ ॥ पंच नमस्कारान् स्मृत्वा पादपोपगम स्थितिः, शुद्ध ध्यान रस उल्लास लय संलीन मानसः, ॥ ५७ ॥ मुनिः आसन्न मुक्ति सौख्य ओघ निष्यंदैः

पूरितं इव सर्वार्थ सिद्धि नामानं विमानं आसदत्. ॥ ५८ ॥ त्रिभिर्विशेषकं ॥

अर्थः-पछी आयुने छेडे करेल छे अनशन जेमणे एवा, कृतार्थ थयेला, अने दिलगिर थता एवा ते अंबरदेववडे सेवाता चरणकमलोवाळा, ॥ ५६ ॥ तथा पंचपरमेष्टिना नमस्कारोनुं स्मरण करीने ( वृक्षनीपेठे ) पादपोपगमन आसने स्थिर रहेला, तथा निर्मल ध्यानरसना आनंदमां लयलीन थयेला हृदयवाळा, ॥ ५७ ॥ ते संवरमुनिराज, नजदीक रहेली मुक्तिना सुखोना समूहना झरणाओथी जाणे भरेलुं होय नही! एवा सर्वार्थसिद्धि नामना विमानमां पहोंच्या. ॥ ५८ ॥ त्रिभिर्विशेषकं ॥

तथ्यां तदित्थमाकर्ण्य संवरस्य मुनेः कथाम् । कर्ममर्मभिदेऽमुष्मै यतध्वं तपसे जनाः ॥ ५९ ॥

अन्वयः-तत् (हे) जनाः! इत्थं संवरस्य मुनेः तथ्यां कथां आकर्ण्य कर्म मर्म भिदे अमुष्मै तपसे यतध्वं ? ॥ ५९ ॥

अर्थः—माटे हे लोको! ए रीतनी ते संवरमुनिराजनी सत्य कथा सांभळीने कर्मोना मर्मोने भेदनारो एवो आ तप करवामाटे (तमो) यत्न करो? ॥ ५९ ॥

## ॥ इति तपश्चरणे संवरमुनीश्वरकथा ॥

इति तपःफल महात्म्योपदर्शने संवरमुनिचरित्रं समाप्तं. आ चरित्र श्रीवर्धमानसूरिविरचित श्रीवासुपूज्यचरित्रनामना महाकाव्यमांथी स्वपरना श्रेय माटे ओधारीने तेना अन्वय तथा गुजरातीभाषांतर सहित पंडित श्रावक हीरालाल हंसराजे पोताना श्रीजैनभास्करोदय छापखानामां छापी प्रसिद्ध कर्युं छे. ॥

॥ इति श्रीसंवरमुनिचरित्रं समाप्तं ॥